# READER - II
## (SAMSKRITA DVITEEYADARSA)

॥ विद्यया विन्दते अमृतम् ॥



# Sanskrit Study Made Easy Series

**A Reformed Series of Four Illustrated Sanskrit Readers, With Grammatical Conversational Exercises, Glossary etc., For a Pleasant & Quick Study of Sanskrit.**

**Most widely used throughout India and Foreign Countries Viz: Ceylon, Siam, Bangkok, Germany, Italy, Australia, California, San Francisco etc.**

AND SELECTED BY THE EMBASSY OF INDIA

*and The Ministry of Education and Scientific Research of Govt. of India for Presentation to Foreign Students of Sanskrit.*

# अनुक्रमणिका—CONTENTS


| पाठः | | | पृष्ठम् |
|---|---|---|---|
| १. | श्रीकृष्णप्रार्थना | (पद्यपाठः) | १ |
| २. | सिंहः | | ५ |
| ३. | नालिकेरवृक्षः | | ८ |
| ४. | परोपकारप्रशंसा | (पद्यपाठः) | १२ |
| ५. | कमलम् | | १४ |
| ६. | नहुषमहाराजः | | १७ |
| ७. | पक्षिणः | | २० |
| ८. | कीलोत्पाटी वानरः | | २४ |
| ९. | धौम्य आरुणिश्च | | २७ |
| १०. | लोभी मत्सरी च | | ३० |
| ११. | श्रीरामगुणानुवर्णनम् | (पद्यपाठः) | ३३ |
| १२. | कदली | | ३६ |
| १३. | हंसः | | ४० |
| १४. | उष्ट्रः | | ४४ |
| १५. | महात्मा दधीचः | | ४७ |
| १६. | मधुकराः | (पद्यपाठः) | ५० |
| १७. | नगरम् | | ५३ |
| १८. | आहारः | | ५६ |
| १९. | समुद्रः प्रवहणं च | | ५९ |

| पाठः | | | पृष्ठम् |
|---|---|---|---|
| २०. | शाकटम् | | ६३ |
| २१. | दैवं पुरुषकारश्च | (पद्यपाठः) | ६६ |
| २२. | त्रिशङ्कुमहाराजः | | ६८ |
| २३. | सहपाठिनां संभाषणम् | | ७२ |
| २४. | गृध्रो मार्जारश्च | | ७७ |
| २५. | हिमालयः | | ८१ |
| २६. | साधवः | (पद्यपाठः) | ८५ |
| २७. | श्रीबुद्धदेवः | | ८७ |
| २८. | विद्यया विन्दते अमृतम् | | ९२ |
| २९. | चाटुश्लोकाः | (पद्यपाठः) | ९६ |
| ३०. | वाराणसीक्षेत्रम् | | ९९ |
| ३१. | श्रीशङ्कराचार्यः | | १०३ |
| ३२. | सुभाषितावलिः प्रथमं दशकम् | (पद्यपाठः) | १०८ |
| | तथा द्वितीयं दशकम् | ,, | १११ |
| | तथा तृतीयं दशकम् | ,, | ११३ |
| | Index of पर्यायपदानि | | ११७ |
| | Do कृत्प्रत्ययान्ताः | | ११९ |
| | Do उपसर्गाः | | १२० |
| | Sanskrit Participles with English equivalents and Examples | | १२२ |

॥ श्रीरामजयम् ॥

॥ विद्यया विन्दते अमृतम् ॥

# ॥ संस्कृताद्वितीयादर्शः ॥



## १. श्रीकृष्णप्रार्थना

जयतु जयतु देवो देवकीनन्दनोऽयं
जयतु जयतु कृष्णो वृष्णिवंशप्रदीपः ।
जयतु जयतु मेघश्यामलः कोमलाङ्गः
जयतु जयतु पृथ्वीभारनाशो मुकुन्दः ॥ १

हे देव हे दयित हे जगदेकबन्धो
हे कृष्ण हे चपल हे करुणैकसिन्धो ।
हे नाथ हे रमण हे नयनाभिराम
हा हा कदा नु भवितासि पदं दृशोर्मे ॥ २

हे गोपालक हे कृपाजलनिधे हे सिन्धुकन्यापते
हे कंसान्तक हे गजेन्द्रकरुणापारीण हे माधव ।
हे रामानुज हे जगत्त्रयगुरो हे पुण्डरीकाक्ष मां
हे गोपीजननाथ पालय परं जानामि न त्वां विना ॥ ३

जिह्वे कीर्तय केशवं मुररिपुं चेतो भज श्रीधरं
पाणिद्वन्द्व समर्चयाच्युतकथाः श्रोत्रद्वय त्वं शृणु ।
कृष्णं लोकय लोचनद्वय हरेर्गच्छाङ्घ्रियुग्मालयं
जिघ्र घ्राण मुकुन्दपादतुलसीं मूर्धन् नमाधोक्षजम् ॥ ४

कृष्णो रक्षतु मां चराचरगुरुः कृष्णं नमस्याम्यहं
कृष्णेनामरशत्रवो विनिहताः कृष्णाय तस्मै नमः ।
कृष्णादेव समुत्थितं जगदिदं कृष्णस्य दासोऽस्म्यहं
कृष्णे भक्तिरचञ्चलाऽस्तु भगवन् हे कृष्ण तुभ्यं नमः ॥ ५
(मुकुन्दमालास्तोत्रात् उद्धृताः इमे श्लोकाः).

(१) प्रश्नाः–१. प्रथमश्लोके प्रथमान्तानि पदानि सम्बुध्यन्ततया विपरिणमय्य वाक्यानि रचयत। २. द्वितीये तृतीये चतुर्थे च श्लोके सम्बुध्यन्तानि पदानि प्रथमान्ततया विपरिणमय्य वाक्यानि घटयत। ३. जिह्वया,चेतसा पाणिद्वन्द्वादिना च किं किं कर्तव्यम्? ४. पञ्चमश्लोके कृष्णशब्दस्य स्थाने सर्वत्र रामशब्दं निवेश्य श्लोकं पठत॥

(२) प्रयोगं विपरिणमयत—

१. चराचरगुरुः कृष्णो मां रक्षतु।
२. भोः श्रोत्रद्वय! त्वमच्युतस्य कथाः शृणु।
३. भोः पुण्डरीकाक्ष! जगत्त्रयगुरुं त्वां विनाऽन्यं न जानामि।

(३) निर्दिष्टानां धातूनां लटः रूपैः वाक्यानि पूरयत—

१. कृष्णस्य भक्ताः सर्वदा तदीयानि चरितानि श्रु ...।
२. भोगिनामगम्यं भगवतस्तत्वं योगिनो ज्ञा ...॥

(४) कृत्प्रत्ययान्ताः (Participles):—

जि to conquer—(जयति) = जितः, जितवान्, जयन्, जीयमानः, जित्वा, विजित्य, जेतुम्, जेतव्यम्, जेयम्।
ज्ञा to know—(जानाति) = ज्ञातः, ज्ञातवान्, जानन्, ज्ञायमानः, ज्ञात्वा, विज्ञाय, ज्ञातुम्, ज्ञातव्यम्, ज्ञेयम्।
श्रु to hear—(शृणोति) = श्रुतः, श्रुतवान्, शृण्वन्, श्रूयमाणः, श्रुत्वा, प्रतिश्रुत्य, श्रोतुम्, श्रोतव्यम्, श्राव्यम्॥

(५) समासः–देवक्याः नन्दनः देवकीनन्दनः—तत्पुरुषसमासः।
अस्मिन् पाठे तत्पुरुष समासान् वदत॥

(६) पर्यायाः–

नयनम् ६—लोचनं नयनं नेत्रम् ईक्षणं चक्षुरक्षिणी॥

---

१. नन्दन *m* son
प्रदीप *m* light
मेघश्यामल *a* black-like a cloud
दृश् *f* eye
पुण्डरीकाक्ष *a. m.* lotus-eyed i.e., विष्णु

२. दयित *a. m.* dear
भवितासि (First future) would be
पदम् *n* object

३. सिन्धुकन्या *f* daughter of the ocean, i.e., लक्ष्मी

पारीण *a* he who fulfils one's desire
रामानुज *m* कृष्ण here राम means बलराम
पर *a* other

४. जिह्वा tongue
चेतः *n* mind
अङ्घ्रियुग्म *n* pair of foot
जिघ्र *P.* smell
घ्राण *n* nose
मूर्धन् *m* head
अधोक्षज *m* विष्णु

५. नमस्यामि *P.* I bow
अमरशत्रु *m* enemy of देवाः

Note that in Sloka 5 the declension of कृष्ण is used in all the 7 cases in singular number.

---

## ABBREVIATIONS USED

*N* Noun विशेष्यम्
*a* Adjective विशेषणम् (can be used in all the 3 genders)
*m* Masculine पुंलिङ्गम्
*f* Feminine स्त्रीलिङ्गम्
*n* Neuter नपुंसकलिङ्गम्
*P.* Parasmaipadi परस्मैपदी
*A.* Atmanepadi आत्मनेपदी
*in.* Indeclinable अव्ययम्



## २. सिंहः

अपि युष्माभिः कदाऽपि कुत्रापि सिंहो दृष्टः ? नास्माभिः दृष्टः। पश्यत, अत्रास्ति सिंहस्य चित्रम्। सिंहो न ग्राम्यः, किन्तु वन्यो मृगः। अरण्यवासिनां शार्दूलसूकरादीनां मध्ये सिंहः शूरो मानी गम्भीरो बलिष्ठश्च। अनितरसाधारणेन विक्रमेण स सर्वान् मृगानतिशेते। अतः स 'मृगराजः' इति प्रथां भजते॥

सिंहानां शिरसि कण्ठे च धूसराः केसराः सन्ति। अतस्ते केसरिण इत्यभिधीयन्ते। तेषामास्यमतीव विस्तृतम्।

तेन ते पञ्चास्या इत्याख्यायन्ते। तेषामक्षिणी पिङ्गले भासुरे च। सिंहेष्वतिदीर्घाः खरा नखराः परुषा दन्ताश्चेश्वरेण सृष्टाः॥

केसरिणो न सर्वत्र देशेषु निवसन्ति। आफ्रिकाखण्डे ते प्राचुर्येणोपलभ्यन्ते। भारतखण्डे तु ते पुरा शुतुद्याः सिन्धोश्च मध्यवर्तिनि सिकतारण्ये न्यवसन्। इदानीं तु ते गुर्जरदेशस्य दक्षिणतः स्थितेषु घोरारण्येषु वसन्ति॥

मृगेन्द्राः प्राधान्येन मत्तेभैः सह विगृह्णन्तस्तेषां मूर्धानमारुह्य गण्डौ च भित्वा तत्रत्यं मांसं भक्षयन्ति। एवं वने स्थितानितरान् मृगानपि ते निघ्नन्ति। यदा ते परितश्चरन्तो न मृगान् विन्दन्ति तदा तारं गर्जन्ति। तद्गर्जनं श्रुत्वा सर्वे मृगाः सभयमितस्ततो धावन्ति। तदा सिंहाः सत्वरं तेषामुपरि निपत्य तान् विध्यन्ति॥

कदाचिदाहारमलभमानः सिंहः सर्वावयवान् स्तब्धीकृत्य भूमौ शेते। तथा शयानं तं दृष्ट्वा मृगास्तं मृतं मन्यमानास्तस्यान्तिके चरन्ति। मृगमागतं दृष्ट्वा सिंहो झटित्युत्थाय तं गृह्णाति। इत्थं सिंहाः स्वबुद्धिकौशलेन जीविकां वर्तयन्ति॥

---

१) प्रश्नाः—१. सिंहः कीदृशो मृगः? २. सिंहानामवयवाः कीदृशाः? ३. सिंहाः कुत्र उपलभ्यन्ते? ४. कीदृशस्तेषामाहारः? ५. कथं च ते तं लभन्ते? ६. सिंहस्य बुद्धिकौशलं वर्णयत॥

२) प्रयोगं विपरिणमयत—

१) केसरिणो न सर्वत्र देशेषु वसन्ति।

२. मृगेन्द्राः प्राधान्येन मत्तेभानां मांसं भक्षयन्ति ।

३. अन्तिकमागतान् मृगान् सिंहो झटिति गृह्णाति ॥

(३) उपसर्गयोगादर्थभेदः—

शी = शेते, अतिशेते, अनुशेते, आशेते, विशेते, संशेते ।

ग्रह् = गृह्णाति, गृह्णीते । अनुगृह्णाति, निगृह्णाति, परिगृह्णाति, प्रतिगृह्णाति, विगृह्णाति, संगृह्णाति । एवम् अनुगृह्णीते इत्यादि आत्मनेपदेऽपि द्रष्टव्यम् ॥

(४) विकरणभेदः—

विद् ज्ञाने to know-वेत्ति । विद् सत्तायाम् to be-विद्यते ।

विद् विचारणे to consider—विन्त्ते ।

विद् प्राप्तौ to obtain—विन्दति, विन्दते ॥

The following sloka shows the different forms of the root विद्

सत्तायां विद्यते ज्ञाने वेत्ति विन्त्ते विचारणे ।
विन्दते विन्दति प्राप्तौ रूपभेदो विदेः स्मृतः ॥

(५) समानशब्दाः—दक्षिणतः, पश्चिमतः, उत्तरतः, पूर्वतः ॥

(६) पर्यायाः—

सिंहः ६—सिंहो मृगेन्द्रः पञ्चास्यो हर्यक्षः केसरी हरिः ।

| | |
|---|---|
| शार्दूल *m* tiger | खर *a* severe, sharp |
| सूकर *m* boar | परुष *a* hard |
| मानिन् *a* possessed of self respect | प्राचुर्य *a* plenty |
| गम्भीर *a* grave | शुतुद्री *f* the river Sutlej |
| धूसर *a* grey | सिन्धु *f* the Indus river |
| केसर *m. n.* the mane | सिकतारण्य *n* sandy jungle |
| पिङ्गल *a* reddish-brown | जीविका *f* livelihood. |



## ३. नालिकेरवृक्षः

वृक्षोऽयं नालिकेर इति नारिकेल इति नारिकेर इति नारीकेल इति नाडिकेर इति केर इति चैवं बहुधाऽभिधीयते। केरोऽयं केरलेषु बाहुल्येन प्ररोहति। अत एवास्य देशस्य 'केरलव्यपदेशः' इत्याचक्षते जनाः ॥

नालिकेराः समुद्राणामासन्नेषु सिकतिलेषु प्रदेशेषु प्ररोप्यमाणाः पञ्चषैरब्दैः फलन्ति। बाल्ये नालिकेराणां द्वित्राणि वर्षाणि यावज्जलसेचनमावश्यकम्। ततः परं ते स्वयमेव

पादैर्भूतलाज्जलमाकृष्य पिबन्ति। क्रमशः प्रवृद्धास्ते प्रथमवयसि पीतं तोयं स्मरन्त इवामृतकल्पमुदकं शिरसि वहन्तो मनुष्याणां अत्युपकारमाचरन्ति ॥ उक्तं च नीतिशतके—

"प्रथमवयसि पीतं तोयमल्पं स्मरन्तः
शिरसि निहितभारा नारिकेला नराणाम् ।
उदकममृतकल्पं दद्युराजीवनान्तं
न हि कृतमुपकारं साधवो विस्मरन्ति ॥"—इति ।

नालिकेरस्य सर्वमङ्गं सप्रयोजनं दृश्यते। केरफलसारो न केवलं विविधेभ्यो व्यञ्जनेभ्य उपयुज्यते, किन्तु तमातपे शोषयित्वा यन्त्रे निधाय निष्पीडितात् तस्मात् स्नेहोऽपि गृह्यते जनैः। स्नेहग्रहणात् परमवशिष्यमाणः कल्कः पिण्याकम् । पिण्याकं गोभ्यो रोचते। केचित्तु तेन विविधान् भक्ष्यविशेषान् कुर्वन्ति ॥

नालिकेरः शाखारहितो वृक्षः। चित्रमवलोक्यताम्—दृश्यते तत्र दीर्घदीर्घो नालिकेरकाण्डः। काण्डस्य शिरसि द्वादशाधिकानि पत्राण्यवेक्ष्यन्ते। केषुचिद्देशेषु केरपत्रैर्गृहपटलादिकं निर्मीयते। तस्य काण्डोऽपि पनसादिवद् गृहदारुत्वेनोपयुज्यते। फलत्वचा रज्जवः क्रियन्ते, आस्तरणान्यप्यूयन्ते ॥

अपरिणतं नालिकेरं लाङ्गलीत्युच्यते। लाङ्गलीजलं निदाघकाले पीयमानं स्वादु हितं च भवति। मद्यकाराः पल्लवकाण्डात् स्यन्दमानं रसं गृहीत्वा मद्यं संपादयन्ति। तत्

केचित् पिबन्ति। किन्तु तद् पीयमानमुन्मादं जनयति। तस्मात् तत् सर्वथा न पेयम् ॥

न सुरां पिबेत्; न कलञ्जं भक्षयेत्; इति हि महतामुपदेशः ॥

---

(१) प्रश्नाः—१. नालिकेरः कथं बहुधाऽभिधीयते २. नालिकेराः कुत्र बाहुल्येन प्ररोहन्ति? ३. कथं ते वर्ध्यन्ते? ४. प्रवृद्धास्ते किं कुर्वन्ति? ५. कानि प्रयोजनानि नालिकेरवृक्षस्य तत्फलस्य च? ६. लाङ्गलीं मद्यं चाधिकृत्य किं जानीध्वे? ७. महान्तः किम् उपदिशन्ति।

(२) कर्तरिप्रयोगं वदत—

१. फलत्वचा रज्जवः क्रियन्ते, आस्तरणान्यप्यूयन्ते।

२. केरफलसारो विविधेभ्यो व्यञ्जनेभ्य उपयुज्यते।

३. यन्त्रे निष्पीडितात् केरफलसारात् स्नेहो गृह्यते जनैः ॥

(३) एकं पदं वदत-(Give one word for) :—

१. आसन्नेषु सिकतिलेषु प्रदेशेषु। २. सर्वम् अङ्गम् ॥

(४) समानशब्दाः—

| | | |
|---|---|---|
| एको | वा द्वौ | वा = एकद्वाः। |
| द्वौ | वा त्रयो | वा = द्वित्राः। |
| त्रयो | वा चत्वारो | वा = त्रिचतुराः। |
| चत्वारो | वा पञ्च | वा = चतुःपञ्चाः। |
| पञ्च | वा षट् | वा = पञ्चषाः, ॥ इत्यादयः |

(५) उपसर्गयोगादर्थभेदः—

युज्—युङ्क्ते, अभियुङ्क्ते, उद्युङ्क्ते, उपयुङ्क्ते, नियुङ्क्ते, प्रयुङ्क्ते, वियुङ्क्ते, विनियुङ्क्ते, संयुङ्क्ते ॥

मा—माति। अनुमाति, निर्माति, परिमाति, प्रमाति ॥

६) कृत्प्रत्ययान्ताः—

ग्रह् to receive—(गृह्णाति)=गृहीतः, गृहीतवान्, गृह्णन्, गृह्यमाणः, गृहीत्वा (अनुगृह्य), ग्रहीतुम्, ग्रहीतव्यम्, ग्राह्यम्। पा (पिब्) to drink—(पिबति)=पीतः, पीतवान्, पिबन्, पीयमानः, पीत्वा, निपीय, पातुम्, पातव्यम्, पानीयम्॥

७) जनपदवाचकाःशब्दा नित्यं पुंलिङ्गा बहुवचनान्ताश्च, यथा
केरलाः, मद्राः, नेपालाः, आन्ध्राः, वङ्गाः, कलिङ्गाः, मगधाः, महाराष्ट्राः, सौराष्ट्राः काश्मीराः, कर्णाटकाः, भारतीयाः, सिंहलाः, आङ्गलाः (Englishmen), कम्बोडियाः (Combodians) इत्यादयः॥

८) पर्यायाः—
संवत्सरः६-संवत्सरो वत्सरोऽब्दो हायनोऽस्त्री शरत् समाः।
पर्णम् ६—पत्रं पलाशं छदनं दलं पर्णं छदः पुमान्॥

---

सिकतिल *a* sandy
अमृतकल्प *a* nearly equal to nector
केरफलसार *m* kernel
व्यञ्जन *n* an article used in seasoning food
आतप *m* heat of the Sun
स्नेह *m* oil
कल्क *m* the viscous sediment deposited by oily substances when ground
पिण्याक *n* oil-cake
नालिकेरकाण्ड *m* the trunk of a coconut tree
गृहपटल *n* the roof of a house
दारु *n* timber
आस्तरण *a* a carpet
अपरिणत *a* unripe
डाङ्गली *f* tender coconut
निदाघ *m* Summer
मद्य *n* toddy
उन्माद *m* intoxication.
सुरा *f* toddy
कलञ्ज *n* flesh
सिंहलाः Ceylonese

## ४. परोपकारप्रशंसा

श्रूयतां धर्मसर्वस्वं यदुक्तं ग्रन्थकोटिषु ।
परोपकारः पुण्याय पापाय परपीडनम् ॥ १

परोपकारः कर्तव्यः प्राणैरपि धनैरपि ।
परोपकारजं पुण्यं न स्यात् क्रतुशतैरपि ॥ २

परोपकारशून्यस्य धिङ् मनुष्यस्य जीवितम् ।
जीवन्तु पशवस्तेषां चर्माप्युपकरिष्यति ॥ ३

परोपकाराय फलन्ति वृक्षाः परोपकाराय वहन्ति नद्यः ।
परोपकाराय दुहन्ति गावः परोपकारार्थमिदं शरीरम् ॥ ४

श्रोत्रं श्रुतेनैव न कुण्डलेन दानेन पाणिर्न तु कङ्कणेन ।
विभाति कायः खलु सज्जनानां परोपकारेण न चन्दनेन ॥ ५

पिबन्ति नद्यः स्वयमेव नाम्भः स्वयं न खादन्ति फलानि वृक्षाः ।
नादन्ति सस्यान्यपि वारिवाहाः परोपकाराय सतां विभूतयः ॥

---

१) प्रश्नाः—१. ग्रन्थकोटिषूक्तं धर्मसर्वस्वं किम्? २. कुतः परोपकारः कर्तव्यः? ३. 'जीवन्तु पशवः' कुत इदं प्रार्थ्यते? ४. परोपकाराय के किं कुर्वन्ति? ५. सज्जनानां कायः केन विभाति? ६. 'परोपकाराय सतां विभूतयः' इदं दृष्टान्तेन निरूपयत?

२) निर्दिष्टानां धातूनां लिङो रूपैः वाक्यानि पूरयत—

१) भूतिमिच्छन्तो जनाः स्वीयानि कर्माणि काले कु....।

२) वयं बालादपि शुकादपि युक्तियुक्तं वचो ग्रह्...।

३) श्रेयस्कामो जनः सूर्योदये सूर्यास्तमये च न शी...।

४) वयं धार्मिकेभ्य आचार्येभ्यो धर्मं, श्रु.... ॥

३) उपसर्गयोगादर्थभेदः—

वह्—वहति, वहते। आवहति, उद्वहति, निर्वहति, प्रवहति, विवहति। एवमात्मनेपदेऽपि। 'प्रवहति' इत्ययं तु नित्यं परस्मैपदीति बोध्यम्।

भा—भाति। प्रतिभाति, विभाति, अनुभाति ॥

४) कृत्प्रत्ययान्ताः—

कृ to do—करोति, कुरुते=कृतः, कृतवान्, कुर्वन्, क्रियमाणः, कृत्वा (अनुकृत्य), कर्तुम्, कर्तव्यम्, करणीयम्, कार्यम्।

मृ to die—म्रियते=मृतः, मृतवान्, म्रियमाणः, मृत्वा (अनुमृत्य), मर्तुम्, मर्तव्यम्, मरणीयम् ॥

५) समानरूपा धातवः—द्रा, पा, भा, मा, या, वा, स्ना, ॥

६) चरन्, वहन्, पश्यन्, रुदन्, गच्छन्—एषां शत्रन्तानां लटि प्रथमपुरुषैकवचने रूपाणि निर्दिशत।

७) पर्यायाः—प्राणाः २—पुंसि भूम्न्यसवः प्राणाः ॥

(पुंसि = पुंलिङ्गे; भूम्नि = बहुवचने)

---

| | |
|---|---|
| क्रतु *m* sacrifice याग | विभूति *f* prosperity |
| वारिवाह *m* cloud मेघ | चर्म *n* skin. |



## ५. कमलम्

कमलानि पयसि पङ्के जायन्ते। अतस्तानि सरसिजानि पङ्कजान्यम्भोजानीत्यादिभिः शब्दैर्व्यवह्रियन्ते। कमलेषु नानाजातयः सन्ति। तत्र नीलमम्भोरुहम् 'उत्पलम्' इति, रक्तम् 'कोकनदम्' इति, सितम् 'पुण्डरीकम्' इति चाभिधां भजति ॥

कुवलयान्यपि सरसि पङ्क एव जायन्ते। अथापि तेषां न पङ्कजादिशब्दैर्व्यवहारः। कुवलयानि कमलाकाराण्येव। किन्तु तेषु सौगन्ध्यं नास्ति ॥

चित्रं पश्य, कानिचित् कुसुमानि मुकुलितानि, कानिचित् विकसितानि च दृश्यन्ते। कुसुमस्याधस्ताद्दृश्यमानः प्रकाण्डो मृणालम्। मृणालस्यान्तर्भागे छिद्राणि तन्तवश्च वर्तन्ते॥

कमलसरांसि कमलिन्य इति कुमुदसरांसि कुमुदिन्य इति चोच्यन्ते। कमलिन्यः सूर्यस्य कुमुदिन्यश्चन्द्रस्य चोदये विकसन्ति। तेन सूर्यः कमलिनीनायक इति, चन्द्रः कुमुदिनीनायक इति च प्रसिध्यतः। हेमन्ते हिमेन सिक्ताः कमलिन्यः स्मरणीयशोभाः सम्पद्यन्ते॥

कमलानां मध्यभागे किञ्जल्काः सन्ति। तेषु सुगन्धयः परागा विद्यन्ते। मधुकराः प्राधान्येन कमलेभ्यो मधु पिबन्ति॥

यद्यपि मल्लिकादीनि कुसुमानि कमलापेक्षया सुगन्धितराणि तथापि तेषामेतावत् सौन्दर्यं नास्ति। अरविन्दान्येव कुसुमेषु सुन्दरतमानि। अत एव पद्मं पद्मायाः सद्म निगद्यते॥

---

१) प्रश्नाः—१. कुतः कमलानि सरसिजानि पङ्कजानीत्यादिभिः शब्दैः व्यवह्रियन्ते? २. उत्पलं कोकनदं पुण्डरीकं च किम्? ३. कुवलयान्यधिकृत्य किं जानीथ? ४. किं नाम मृणालम्? ५. 'कमलिनीनायकः' 'कुमुदिनीनायकः' इति व्यपदेशे किं कारणम्? ६. कुतः पद्मं पद्मायाः सद्म निगद्यते?

२) तत्तद्धातूनां निर्दिष्टैः लकारैः वाक्यानि पूरयत—

१) सरसिजानि शैवलेनावृतान्यपि रम्याणि भा...(लट्)।

२) मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तन्....(लट्)।

३) त्वं तस्मात् सरसः पञ्चषाणि कमलानि ग्रह्...(लोट्)॥

३) अतिशायनार्थकौ तरप्-तमप् प्रत्ययौ (Degrees of Comparison)—

सुगन्धि सुगन्धितरम् सुगन्धितमम्।
सुन्दरम् सुन्दरतरम् सुन्दरतमम्॥

४) कृत्प्रत्ययान्ताः—

सिच् to water—(सिञ्चति) सिक्तः, सिक्तवान्, सिञ्चन्, सिच्यमानः, सिक्त्वा, (निषिच्य) सेक्तुम्, सेक्तव्यम्, सेचनीयम्, सेच्यम्।

मुच् to set free—(मुञ्चति) मुक्तः, मुक्तवान्, मुञ्चन्, मुच्यमानः मुक्त्वा, (विमुच्य) मोक्तुम्, मोक्तव्यम्, मोचनीयम्, मोच्यम्॥

५) उपसर्गयोगादर्थभेदः—

अय्—अयते। उद्यते परा + अयते = पलायते।

पद्—पद्यते। आपद्यते, उत्पद्यते, उपपद्यते, निष्पद्यते, प्रपद्यते, प्रतिपद्यते, विपद्यते, विप्रतिपद्यते, सम्पद्यते॥

६) पर्यायाः—

पद्मम् १७—वा पुंसि पद्मं नलिनम् अरविन्दं महोत्पलम्।
सहस्रपत्रं कमलं शतपत्रं कुशेशयम्॥
पङ्केरुहं तामरसं सारसं सरसीरुहम्॥
बिसप्रसून राजीव पुष्कराम्भोरुहाणि च॥

पुष्पम् ५—स्त्रियः सुमनसः पुष्पं प्रसूनं कुसुमं सुमम्॥
(स्त्रियः सुमनसः—सुमनस् शब्दः स्त्रीलिङ्गः, बहुवचनान्तश्च इत्यर्थः)॥

उत्पल *n* blue lotus
कोकनद *n* red lotus
पुण्डरीक *n* white lotus
अभिधा *f* name नामन्
सौगन्ध *n* fragrance; odour
मुकुलित *a* half blossomed
विकसित a blossomed
प्रकाण्ड *m* stem
मृणाल *n* stem of a lotus
तन्तु *m* fibre
किञ्जल्क *m* filament of a lotus
पराग *m* the pollen of a lotus
अरविन्द *n* a lotus
पद्म *n* lotus
पद्मा *f* Goddess Lakshmi
सद्मन् *n* abode
शैवल *n* moss
लक्ष्मन् *n* mark

---

## ६. नहुषमहाराजः

पुरा किल चन्द्रवंशे पुरूरवसः पौत्र आयुषः पुत्रः शीलवान् मतिमान् धार्मिकश्च नहुषो नाम नरपतिरासीत् । स च महता विभवेन शतमश्वमेधानाहृत्य द्वितीयः शतक्रतुरिव व्यराजत ॥

अत्रान्तरे वृत्रं हत्वा पापमवाप्य स्वपदात् प्रच्युतो वासवः तत्प्रायश्चित्ततया कञ्चित्कालमन्तर्जले न्यलीयत । तस्मिन्नवसरे नहूषोऽयं देवराजपदमधिरोपितः । तत्पदमधिरूढमात्र एव स राजा श्रीमदान्धः सर्वमेव लोकं तृणायामन्यत ॥

अथ स इन्द्राणीं द्रष्टुमिच्छन् महताऽऽडम्बरेण तस्या वासभवनं गच्छन् सप्तर्षीनानाय्य स्वशिबिकावहनायादिदेश। सप्तर्षयस्तस्य शासनमनुल्लङ्घनीयं ज्ञात्वा शिबिकां वहन्तः कथं कथमपि चेलुः। राजा च तान् सर्वान् पदे पदे स्खलतः परुषवचनैरनिन्दन्। विशेषतश्चेतरैः सह गन्तुमशक्तं ह्रस्वकायमगस्त्यम्—'कुम्भडिम्भ! सर्प सर्प' इत्यधिचिक्षेप॥



आत्मानमधिक्षिप्तं पश्यन् भृशं व्याकुलीभूतश्चुलुकीकृताम्भोराशिः कुम्भयोनिर्नहुषं 'सर्पो भव' इत्यशपत्। शप्तमात्र एव नहुषो महाकायः काकोदरो भूत्वा शिबिकातः क्षितौ पपात॥

मानो हि महतां धनम्। अतः उन्नतं पदं प्राप्तो मान्यान् नावमन्येत॥

१) प्रश्नाः—१. नहुषः कीदृशो नरपतिरासीत्? २. कस्मिन्न-
वसरे स देवराजपदमधिरोपितः? ३. कुतः स महाकायः
काकोदरोऽभवत्? ४. नहुषस्य कथया क उपदेश गृह्यते
* युष्माभिः?

२) लोकं तृणायामन्यत—अत्र व्याकरणविशेषः कः?

३) कृत्प्रत्ययान्ताः—

हन् to kill—हन्ति=हतः, हतवान्, घ्नन्, हन्यमानः,
हत्वा, (निहत्य) हन्तुम्, हन्तव्यः, हननीयः, वध्य.।

मन् to think—मन्यते=मतः, मतवान्, मन्यमानः,
मत्वा, (अवमत्य) मन्तुम्, मन्तव्यः, मननीयः, मान्यः,।

शप् to curse—शपति=शप्तः, शप्तवान्, शपन्, शप्य-
मानः, शप्त्वा, (अभिशप्य) शप्तुम्, शप्तव्यम्,
शपनीयम्।

क्षिप् to throw—क्षिपति=क्षिप्तः, क्षिप्तवान्, क्षिपन्,
क्षिप्यमाणः, क्षिप्त्वा, (आक्षिप्य) क्षेप्तुम्, क्षेप्तव्यम्,
क्षेपणीयम्, क्षेप्यम्॥

४) पर्यायाः—

इन्द्राणी ५—पुलोमजा शचीन्द्राणी पौलोमी मघवप्रिया।
अगस्त्यः ४—कुम्भयोनिरगस्तिः स्यात् अगस्त्यः-
[कुम्भसम्भवः॥

सर्पः २६—सर्पः प्रदाकुः भुजगो भुजंगोऽहिर्भुजंगमः।
आशीविषो विषधरश्चक्री व्यालः सरीसृपः॥ १
कुण्डली गूढपाच्चक्षुःश्रवाः काकोदरः फणी।
दर्वीकरो दीर्घपृष्ठो दन्दशूको बिलेशयः॥ २
उरगः पन्नगो भोगी जिह्मगः पवनाशनः।

विभव *m* riches
आहृत्य *in*. having performed
शिबिका *f* palanquin
शासन *n* order
सर्प *m*. serpent
सर्प *v*. (Imperative mood) you move on.
चुलुकीकृताम्भोराशि *m* he who has made. the ocean, a handful of water



## ७. पक्षिणः

पक्षिणां पक्षौ पादौ च स्तः। अतस्ते पक्षाभ्यां व्योम्नि डयितुं पादाभ्यां भूमौ चलितुं च शक्नुवन्ति। यदा ते डयन्ते

तदा पक्षौ विवृण्वन्ति, यदा च क्वचिदुपविशन्ति तदा संवृण्वन्ति। कुक्कुटादयः केचिदण्डजाः पक्षवन्तोऽपि सम्यग्डयितुं न प्रभवन्ति। गरुडाः कदाचिदत्यूर्ध्वं नभसि पतन्ति। हंसादयः केचित् पक्षिणो जले चरन्ति॥

पक्षिणो वृक्षशाखासु नीडानि निर्माय तत्र निवसन्ति। नीडानि तृणकणैर्निर्मीयन्ते। आलेख्येऽस्मिन्नेका विहगी शाखायामुपविष्टा। तस्याः सन्निधे कश्चित् कुलायो दृश्यते। तस्मिन् कुलाये चत्वारः शावकाः सन्ति। सा विहगी तेभ्यो धान्यकणान् ददाति॥

विहङ्गा अहन्याहाराय चरित्वा सायं स्वनीडमागच्छन्ति। रात्रौ तत्र निद्राय प्रातस्तरां प्रबुध्यन्ते। प्रबुध्य च वृक्षात् वृक्षमटन्तो मधुरं विरुवन्तश्च जनानामानन्दं जनयन्ति। उदिते च भानौ भूय एवाहारार्थं भ्राम्यन्ति। पक्षिणां दन्ताभावात् ते चञ्च्वा भक्ष्याणि खादन्ति। वाग्गुदानां तु दन्ताः सन्ति, पक्षौ च स्तः। ते न अण्डजाः। अतः ते मृगजातावन्तर्भवन्ति॥

विहगाः फलानि धान्यानि कृमीन् कीटान् वा यथेष्टमाहरन्ति। पारावतः पिकः शुकश्चटकश्च प्राधान्येन धान्यानि फलानि च खादन्ति। गृध्रस्तार्क्ष्यो बक इत्यादयो मांसमप्यश्नन्ति। काको मांसं धान्यं फलं च भक्षयति। अग्निकणभक्षिणः शिलाशकलभक्षिणश्च केचिद्विहगाः श्रूयन्ते।

चातकास्तु केवलं जलदेभ्यः पतितान् जलबिन्दूनाहरन्तो जीवन्तीति कवयो वर्णयन्ति ॥

---

१) प्रश्नाः—१. के के पक्षिणः कुत्र कुत्र कथं चलन्ति? २. ते कुत्र निवसन्ति? ३. दिवा नक्तं च पक्षिणः कथं कालं नयन्ति? ४. के के पक्षिणः किं किं भक्षयन्ति? ५. वाग्गुदाः कस्यां जातौ अन्तर्भवन्ति? कुतः?

२) नाम निर्दिश्य प्रयोगं विपरिणमयत—

१) विहगाः फलानि कीटान् वा यथेष्टमाहरन्ति।

२) अग्निकणभक्षिणः केचिद्विहगाः श्रूयन्ते।

३) पक्षिभिर्वृक्षाणां शाखासु नीडानि निर्मीयन्ते ॥

३) निर्दिष्टैस्तत्तद्धातूनां लकारैः वाक्यानि पूरयत—

१) वयं व्योमयानेन व्योम्नि डयितुं शक्...(लट्)।

२) वयं शिशुभ्यो गवां क्षीरं यच्छ्...(लट्)।

३) न खलु क्षुधितोऽपि शार्दूलः शाद्वलं अद्...(लट्)।

४) कृत्प्रत्ययान्ताः—

विश् to enter—विशति = विष्टः, विष्टवान्, विशन्, विश्यमानः, विष्ट्वा, (प्रविश्य) वेष्टुम्, वेष्टव्यम्, वेश्यम्।

बुध् to know—बुध्यते = बुद्धः, बुद्धवान्, बुध्यमानः (active) बुध्यमानः (Passive) बुद्ध्वा, (प्रबुध्य) बोद्धुम्, बोद्धव्यम्, बोधनीयम्, बोध्यम् ॥

५) उपसर्गयोगादर्थभेदः—

विश्—विशति । आविशति, उपविशति, निर्विशति प्रविशति, संविशति ।

वृ—वृणोति, वृणुते, । आवृणोति, अपवृणोति, अपावृणोति, विवृणोति, संवृणोति । एवम्, आवृणुते इत्यादि आत्मनेपदेऽपि द्रष्टव्यम् ॥

६) पर्यायाः—

पक्षी २७—खगो विहङ्ग विहग विहङ्गमविहायसः ।
शकुन्ति पक्षि शकुनि शकुन्त शकुनद्विजाः ।
पतत्रि पत्रि पतग पतत्पत्ररथाण्डजाः ।
नगौकोवाजिविकर वि विष्कर पतत्रयः ॥
नीडोद्भवाः गरुत्मन्तः पित्सन्तो नभसङ्गमाः ॥

---

पक्ष *m*. a wing
व्योमन् *n* sky
डयन्ते *A* fly
विवृण्वन्ति *P*. open
संवृण्वन्ति *P*. close
अण्डज *m* bird
आलेख्य *n* picture
कुलाय *m* nest
विरुवत् *a* crying
चञ्चु *f* beak
वाग्गुद *m* bat
कृमि *m* worm
कीट *m* an insect
पारावत *m* pigeon
चटक *m* sparrow
गृध्र *m* vulture
तार्क्ष्य *m* Garuda
बक *m* crane
चातक *m* a kind of bird which lives only on rain drops.

---

## ८. कीलोत्पाटी वानरः

अव्यापारेषु व्यापारं यो नरः कर्तुमिच्छति ।
स नूनं निधनं याति कीलोत्पाटीव वानरः ॥

तद्यथा—अस्ति ब्रह्मारण्यस्य समीपे विरिञ्चिपुरं नाम नगरम् । तत्र शुभदत्तनामा धनवान् वैश्यः प्रतिवसति । तस्य चिराय सन्ततिर्नासीत् । तेन स धर्मपरो भूत्वा दानधर्मादिकमाचरत् । व्रतान्यन्वतिष्ठत् । कूपतटाकादीन्यखानयत् । अन्ततश्च दैवज्ञानामादेशेन कञ्चिद्देवालयं निर्मातुमुपाक्रमत ॥



अथ सोऽरण्यपरिसरे कारुभिर्दारुकर्म कारयामास । एकस्मिन् दिवसे कारवः करपत्रेणैकं स्तम्भं किञ्चिद्दूरं विदार्य

द्वयोः खण्डयोर्मध्ये कीलकं निधाय मध्याह्ने भोजनाय गृहं गताः। तदा तत्र कश्चिद्बलवान् वानरसन्दोहः क्रीडन्नागतः ॥

वानराः प्रकृत्या चपलाः। अव्यापारेषु व्यापारो वानराणां ज़ातौ प्रसिद्धः। तेषामेको वानरः कालप्रेरित इव तं कीलकं हस्ताभ्यां धृत्वा पादौ च दारुखण्डयोरुपरि निधायोपविष्टः। तदा तस्य पुच्छो दारुखण्डयोरभ्यन्तरं प्राविशत्। स वानरस्तं कीलकमचलयत्। स तु दृढतरोऽभूत्। अथापि स चापल्यादविरतो भूयोऽपि चलयन् महता यत्नेन तं कीलकमाकृष्टवान्। आकृष्टे च कीलके चूर्णितपुच्छः स इष्टदेवतां स्मरन् पञ्चत्वं गतः ॥

---

१) प्रश्नाः—१. कः कुत्र देवालयं निर्मातुमुपाक्रमत? २. कुत्र वानरसन्दोहः क्रीडन्नागतः? ३. एको वानरः किमकरोत्? ४. ततः किं वृत्तम्? ५. अनया कथया किमस्माभिर्गृह्यते?

२) अधोरेखाङ्कितानां स्थाने तत्तद्धातूनां 'लिट्' रूपाणि निवेशयत—

१. तस्य चिराय सन्ततिः न आसीत्।

२. तस्य पुच्छो दारुखण्डयोरभ्यन्तरं प्राविशत्।

३) प्रयोगान्तरतया विपरिणमयत—

१. अलं जलसम्पृक्तं महाजलाय भवति।

२. किं हीनकुसुमं सहकारं मधुकराः सेवन्ते?

४) उपसर्गयोगादात्मनेपदम्—उपक्रमते, प्रक्रमते ॥

५) कृत्प्रत्ययान्ताः (Participles)

कृष् to plough—कर्षति = कृष्टः, कृष्टवान्, कर्षन्. कृष्यमाणः, कृष्ट्वा, (आकृष्य) कष्टुम्, कष्टव्यम्, कर्षणीयम्।
पिष् to crush—पिनष्टि = पिष्टः, पिष्टवान्, पिंषन्, पिष्यमाणः पिष्ट्वा, (निष्पिष्य) पेष्टुम्, पेष्टव्यम्, पेषणीयम् ॥

६) पर्यायाः—

वानरः ९—कपि प्लवङ्ग प्लवग शाखामृग वलीमुखाः
मर्कटो वानरः कीशो वनौकाः ॥

दैवज्ञः ८—

सांवत्सरो ज्यौतिषको दैवज्ञगणकावपि ।
स्युर्मौहूर्तिक मौहूर्त ज्ञानिकार्तान्तिका अपि ॥

---

दैवज्ञ *m* astrologer
आदेश *m* advice
कारु *m* carpenter
करपत्र *n* saw
कीलक *m* wedge
सन्दोह *m* group; multitude
प्रकृति *f* natural form
इष्टदेवता *f* Favourite Deity
पञ्चत्व *n* Death
सहकार *m* mango tree

---



## ९. धौम्य आरुणिश्च

आसीत् कश्चिदृषिर्धौम्यो नाम। तस्य शिष्यास्त्रयो बभूवुः-आरुणिः, उपमन्युः, वेदश्च, इति। स एकदा शिष्यमारुणिं पाञ्चाल्यं प्रेषयामास—'गच्छ, केदारखण्डं बधान'—इति॥

स उपाध्यायेन समादिष्ट आरुणिस्तत्र गत्वा तत् केदारखण्डं बन्धुं नाशकत्। स क्लिश्यमानोऽपश्यदुपायम्—'भवतु, एवं करिष्यामि'—इति। स तत्र केदारखण्डे संविवेश। शयाने च तथा तस्मिन्नुदकं तस्थौ॥

ततः किञ्चिदतीत्योपाध्यायो धौम्यः शिष्यावपृच्छत्— 'क्व आरुणिः पाञ्चाल्यो गतः?'—इति। तौ तं प्रत्यूचतुः— 'भगवन्! त्वयैव प्रेषितो गच्छ केदारखण्डं बधान'—इति। स एवमुक्तः प्रत्युवाच—'तर्हि तत्र सर्वे गच्छामो यत्र स गतः' इति। तत्र गत्वोपाध्यायस्तस्याह्वानाय शब्दं चकार—'भो आरुणे! पाञ्चाल्य! क्वासि? वत्स! एहि'—इति॥

स तदाकर्ण्यारुणिरुपाध्यायवाक्यं तस्मात् केदारखण्डात् सहसोत्थाय तमुपाध्यायमुपतस्थे, प्रोवाच चैनम्—'अयमस्म्यत्र केदारखण्डे निस्सरमाणमुदकमवारणीयं संरोद्धुं संविष्टः। भगवच्छब्दं श्रुत्वैव सहसा विदार्य केदारखण्डम्, भवन्तमुपस्थितः। तदभिवादये भवन्तम्। आज्ञापयतु भवान् कमर्थं करवाणि'—इति॥

स एवमुक्त उपाध्यायः प्रत्युवाच—'यस्मात् केदारखण्डं विदार्योत्थितस्तस्मात 'उद्दालक' एव नाम्ना त्वं भविष्यसि; यस्माच्च मद्वचनमनुष्ठितं तस्माच्छ्रेयोऽवाप्स्यसि। सर्वे च वेदास्ते प्रतिभास्यन्ति, सर्वाणि च शास्त्राणि'—इति।

अथोपाध्यायेनानुगृहीत आरुणिर्गुरुकुलात् गृहं न्यवर्तत॥

---

१) **प्रश्नाः** १. आरुणिः कस्य शिष्यः? २. तमुपाध्यायः कुत्र प्रेषयामास? ३. उपाध्यायेनादिष्टः स किं चकार? ४. किञ्चिदतीत्योपाध्यायेनाहूतः स किं प्रोवाच? ५. उपाध्यायः किं प्रत्युवाच?

२) तत्तद्धातूनां निर्दिष्टैः लकारैः वाक्यानि पूरयत—

१) पुरा शिष्या गुरुकुले वसन्तो विद्यां ग्रह्...(लिट्)।

२) उपाध्यायेनादिष्टः शिष्यो गां गोष्ठे बन्ध्...(लट्)।

३) केदारखण्डे शयानः स निःसरमाणमुदकं रुध्...(लिट्)।

४) नदी पर्वतादुत्पद्य समुद्रम् उप + इ...(लट्)॥

३) कृत्प्रत्ययान्ताः—

बन्ध् to bind—बध्नाति = बद्धः- बद्धवान्, बध्नन्, बध्यमानः, बद्ध्वा, आबध्य, बन्धुम्, बद्धव्यम्, बध्यम्।

रुध् to obstruct रुणद्धि = रुद्धः, रुद्धवान्, रुन्धन्, रुध्यमानः, रुद्ध्वा, (निरुध्य) रोद्धुम्, रोधनीयम्, रोद्धव्यम्, रोध्यम्॥

४) उपसर्गयोगादर्थभेदः—

इ—एति। अत्येति, अध्येति, अन्वेति, उपैति, अभ्येति, अवैति, प्रत्येति, व्यपैति, समेति।

ज्ञा—ज्ञापयति। आज्ञापयति, विज्ञापयति, अनुज्ञापयति॥

५) उपसर्गयोगादात्मनेपदम्—स्था—तिष्ठति। उपतिष्ठते।

६) पर्यायाः—

गुरुः५—उपाध्यायोऽध्यापकः स्यादाचार्योदेशिको गुरुः।

शिष्यः५—छात्रान्तेवासिनौ शिष्ये शैक्षाः प्राथमकल्पिकाः।

यशः ७—यशः कीर्तिः समज्या च स्तवः स्तोत्रं स्तुतिर्नुतिः

---

केदारखण्ड *m* small dyke

संविवेश *P.* lied down

एहि (आ+इहि) *v* (you) come

पाञ्चाल्य *a* native of पाञ्चाल

गुरुकुल *n* teacher's abode

---

## १०. लोभी मत्सरी च

लोभो मत्सरश्च पुरुषस्य श्रेयसः पन्थानमवरुन्धाते। मत्सरी पुरुषः परस्य हानिमेवात्मनो लाभं मन्यते। लोभी तु लोभेनान्धीकृतो गर्तपातं न पश्यति। श्रूयते चात्र काचित् कथा, यथा—आस्तामेकस्मिन् ग्रामे सुन्दसुन्दरनामानौ द्वौ पुरुषौ। तयोः सुन्दोऽतीव लोभी, सुन्दरोऽत्यन्तं मत्सरी चासीत्। तावेकदा चराचरगुरुं भगवन्तं परमेश्वरं प्रत्यक्षीकर्तुं कचिच्छिवमन्दिरे तपस्तेपाते॥

तयोस्तपसा प्रीतो भवानीपतिः सद्य एवाविर्भूय जगाद—'भोः साहसिकौ! युवयोरनन्यसाधारण्या भक्त्या तुष्टोऽस्मि। अलं भूयसा तपसा। वरं वृणीतम्। यद्वरिष्येथे तद्दास्यामि। परन्तु, यः प्रथमं यद्वरिष्यते स तल्लभेत। अन्यस्तु तदेव द्विगुणं लप्स्यते'—इति॥

भगवतो महादेवस्य तद्वचनं श्रुत्वा लोभी सुन्दः—'नाहमादौ वरं वृणे। अयं मम सखा भूरि द्रविणं याचिष्यते! तदेव द्विगुणं मया लभ्येत'—इति विचिन्त्य स्वयं तूष्णीमास्त॥

परस्योत्कर्षमसहमानो मत्सरी सुन्दरस्तु लोभिनं वञ्चयितुकामः साष्टाङ्गं प्रणिपत्य शिवमभ्यर्थयामास—'भगवन्! भक्तवत्सल! यदि मयि प्रसन्नोऽसि यदि च ते मय्यनुकम्पा तर्हि ममैकं नयनमन्धीभवतु'—इति। 'तथाऽस्तु' इति शूलिनोक्ते

मत्सरी सद्य एवैकाक्षो जातः। लोभिनस्तु द्वे अप्यक्षिणी उपहते अभूताम् ॥

---

१) प्रश्नाः—१. सुन्दः सुन्दरश्च कीदृशावास्ताम्? २. तौ किमर्थं तपस्तेपाते? ३. भवानीपतिराविर्भूय किं जगाद? ४. तद्वचनमाकर्ण्य लोभी सुन्दः किमचिन्तयत्? ५. मत्सरी सुन्दरः शिवं किमभ्यर्थयामास? ६. तेन किं वृत्तम्?

२) लिटः स्थाने 'लङ्' रूपाणि निवेशयत—

१) पुरा विश्वामित्रो नाम ऋषिर्घोरं तपस्तेपे।
२) तस्य तपसा तुष्टो भगवांस्तस्य पुरस्तादाविर्बभूव।
३) तथा विचिन्त्य लोभी सुन्दस्तूष्णीमासाञ्चक्रे ॥

३) प्रयोगं विपरिणमयत—

१) गच्छ, द्वे दारुखण्डे बधान।
२) आज्ञापयतु भवान् कमर्थं करवाणि।
३) परितुष्टाद्भगवतः स वरं वृणीते।
४) दुष्टः स्वदोषान् संवृणोति, परदोषांश्चापावृणोति ॥

४) विकरणभेदः—वृ—वरणे—वृणाति, वृणीते।
वृ—आच्छादने—वृणोति, वृणुते ॥

५) उपसर्गयोगादर्थभेदः—

सद्—सीदति। आसीदति, उत्सीदति, उपसीदति, निषीदति, प्रसीदति, विषीदति, प्रत्यासीदति ॥
कम्पू—कम्पते। अनुकम्पते

६) कृत्प्रत्ययान्ताः —

प्री to be pleased — प्रीयते = प्रीतः, प्रीतवान्, प्रीयमाणः, प्रीत्वा, (संप्रीय), प्रेतुम्, प्रेतव्यम्।

तुष् to be pleased — तुष्यति = तुष्टः, तुष्टवान्, तुष्यन्, तुष्ट्वा, (सन्तुष्य) तोष्टुम्, तोषणीयम्, तोष्यम्॥

७) अतिशायनार्थकाः (Degrees of comparison):—

| Positive | Comparitive | Superlative |
|---|---|---|
| बहुः | भूयान् | भूयिष्ठः |
| पटुः | पटीयान्-पटुतरः, | पटिष्ठः-पटुतमः |
| महान् | महीयान्-महत्तरः | महिष्ठः-महत्तमः |
| दूरः | दवीयान् | दविष्ठः |
| अन्तिकः | नेदीयान् | नेदिष्ठः |

८) पर्यायाः—

मत्सर १—मत्सरोऽन्यशुभद्वेषे।

लोभः ३—लोभस्तृष्णा च गर्धनम्।

लोभी ६—लुब्धोऽभिलाषुकस्तृष्णक् लोभी गृध्नुश्च गर्धनः।

---

लोभ *m* avarice, greed
मत्सर *m* jealousy
हानि *f* loss
गर्तपात *m* falling into a ditch
शिवमन्दिर *n* Siva's temple
साहसिक *a* bold
द्विगुण *a* twofold
द्रविण *n* wealth
शूलिन् *m* Lord Siva
उपहत *a* injured
अक्षि the eye

## ११. श्रीरामगुणानुवर्णनम्

इक्ष्वाकुवंशप्रभवो रामो नाम जनैः श्रुतः ।
नियतात्मा महावीर्यो द्युतिमान् धृतिमान् वशी ॥ १

बुद्धिमान् नीतिमान् वाग्मी श्रीमाञ्छत्रुनिबर्हणः ।
विपुलांसो महाबाहुः कम्बुग्रीवो महाहनुः ॥ २

महोरस्को महेष्वासो गूढजत्रुररिन्दमः ।
आजानुबाहुः सुशिराः सुललाटः सुविक्रमः ॥ ३

समः समविभक्ताङ्गः स्निग्धवर्णः प्रतापवान् ।
पीनवक्षा विशालाक्षो लक्ष्मीवाञ्छुभलक्षणः ॥ ४

धर्मज्ञः सत्यसन्धश्च प्रजानां च हिते रतः ।
यशस्वी ज्ञानसम्पन्नः शुचिर्वश्यः समाधिमान् ॥ ५

प्रजापतिसमः श्रीमान् धाता रिपुनिषूदनः ।
रक्षिता जीवलोकस्य धर्मस्य परिरक्षिता ॥ ६

रक्षिता स्वस्य धर्मस्य स्वजनस्य च रक्षिता ।
वेदवेदाङ्गतत्त्वज्ञो धनुर्वेदे च निष्ठितः ॥ ७

सर्वशास्त्रार्थतत्त्वज्ञः स्मृतिमान् प्रतिभानवान् ।
सर्वलोकप्रियः साधुरदीनात्मा विचक्षणः ॥ ८

सर्वदाभिगतः सद्भिः समुद्र इव सिन्धुभिः ।
आर्यः सर्वसमश्चैव सदैव प्रियदर्शनः ॥ ९

स च सर्वगुणोपेतः कौसल्यानन्दवर्धनः ।
समुद्र इव गाम्भीर्ये धैर्येण हिमवानिव ॥ १०

विष्णुना सदृशो वीर्ये सोमवत् प्रियदर्शनः ।
कालाग्निसदृशः क्रोधे क्षमया पृथिवीसमः ॥ ११

धनदेव गुणस्त्यागे सत्ये धर्म इवापरः ।
तमेवं गुणसम्पन्नं रामं सत्यपराक्रमम् ॥ १२

ज्येष्ठं श्रेष्ठगुणैर्युक्तं प्रियं दशरथः सुतम् ।
प्रकृतीनां हितैर्युक्तं प्रकृतिप्रियकाम्यया ॥ १३
यौवराज्येन संयोक्तुम् ऐच्छत् प्रीत्या महीपतिः ॥ १४

(श्रीमद्वाल्मीकिरामायणे बालकाण्डे प्रथमसर्गात्
उद्धृताः ८—२० श्लोकाः)

---

१) प्रश्नाः—१. श्रीरामस्य गुणान् स्व स्व वाक्यैः वर्णयत ।
२) दशरथः केन कारणेन रामं यौवराज्येन योक्तुमैच्छत् ?

२) निर्दिष्टानां धातूनां 'लङ्' रूपैः वाक्यानि पूरयत—
१) श्रीरामः इक्ष्वाकुवंशेदशरथस्य सुतत्वेन—(जन्) ।
२) स नीत्या प्रीत्या च प्रजाः—(पाल्) ।
३) श्रीरामः स्मृतिमान् प्रतिभानवांश्च—(अस्) ॥

३) क्त्वाप्रत्ययान्तैः पदैः वाक्यानि पूरयत—

१) रामः पुरा पितुर्वचनाद्राज्यं त्यज्...वनं गतवान्।

२) पञ्चवट्यां वसतस्तस्य सहचरीं रावणो हृ...लङ्कां गतः।

३) रामो वानरैः सह सागरं तॄ...लङ्कां प्रविष्टवान्।

४) तत्र रणे रावणं हन्-राज्यं च विभीषणाय दा—सीतामादायायोध्यां प्रतियातवान्॥

४) पर्यायाः—

बुद्धिः १४— बुद्धिर्मनीषा धिषणा धीः प्रज्ञा शेमुषी मतिः।
प्रेक्षोपलब्धिश्चित् संवित् प्रतिपज्ज्ञप्तिचेतनाः

---

वशिन् *m* one who has subdued his passions

वाग्मिन् *m* an eloquent man

निबर्हण *a* destroyer

कम्बुग्रीव *a* having the neck like conch shell

वेद *m* the scriptures of the Hindus, viz. ऋग्वेद, यजुर्वेद, सामवेद & अथर्ववेद

वेदाङ्ग *n* name of certain classes of works auxiliary to the Vedas

They are six in number-

शीक्षा व्याकरणं छन्दो
निरुक्तं ज्योतिषं तथा।
कल्पश्चेति षडङ्गानि
वेदस्याहुर्मनीषिणः॥

प्रतिभानवान् *a* real witted.

सिन्धु *f* a river

सोम *m* moon

कालाग्नि destructive fire also श्रीरुद्रमूर्ति

धनदः *m* epithet of कुबेर

प्रकृति *f* the subjects (of a King)

संयोक्तुं *in* to entrust with.

## १२. कदली

जगति विद्यामानास्तरुलतादिरूपा उद्भिदः केचित्
फलपाकान्ताः, केचितथाभूताश्च। तेषु फलपाकान्ता उद्भिदः
'ओषधयः' इत्युच्यन्ते। कदलीनां फलपाक एवान्तो
भवति। अतस्ता ओषधयो भवन्ति। व्रीहियवादयोऽप्योषधि-
वर्गेऽन्तर्भवन्ति॥



कदल्यः फलदेषूद्भित्सु प्रशस्ताः क्षिप्रफलाश्च। वर्षेणैकेन
ताः फलन्ति। कदलीप्रसव एकस्मिन् शतद्वयाधिकानि फलानि
स्युः। सहस्रफला अपि केचिद्रम्भातरवः सन्ति॥

रम्भाफलानि नानाजातीयानि सन्ति, तेषां गुणो वर्ण आकारो रुचिश्च तत्तज्जातिभेदाद्भिद्यन्ते। सामान्यतः कदलीफलानि त्वचि पीतवर्णानि। कानिचिद्रक्तवर्णानि। अन्यानि कानिचिदन्तः पक्वान्यपि त्वचि हरितवर्णानि अपक्वानीव लक्ष्यन्ते। कानिचित् फलानि भक्ष्यमाणानि ज्वरमुत्पादयन्ति॥

कदल्यः प्राधान्येन भारतवर्षे सर्वत्र प्ररोहन्ति। आफ्रिकामेरिकाखण्डयोरपि ता बहुत्रोपलभ्यन्ते। कदल्याः सर्वोऽपि भाग उपयोगाय कल्पते। तस्याः पत्राणि भोजनामत्रत्वेनोपयुज्यन्ते। कदल्याः काण्डे स्थितानां त्वचां पाटनायामन्ते काण्डसार उपलभ्यते। तस्मात् काण्डसारादमेरिकाखण्डस्थाजनाः सक्तून् सम्पाद्य तैरपूपान् राधयन्ति। एवं कदलीफलेभ्योऽपि शोषितेभ्योऽपूपोपयुक्तान् सक्तून् सम्पादयन्ति जनाः॥

कदलीद्रुमाणां मूलेऽङ्कुराः प्ररोहन्ति। ते स्थलान्तरे संरोप्यमाणाः पुष्टाङ्गाः फलानि वितरन्ति। केषाञ्चित् कदलीफलानामन्तर्भागे बीजानि विद्यन्ते। तान्यप्युप्यमानान्युद्भिद्यन्ते। कदल्यो दोहदं जलं च सर्वदाऽपेक्षन्ते॥

---

१) प्रश्नाः-१. का नाम ओषधयः? २. कदल्यः कथमोषधिवर्गेऽन्तर्भवन्ति? ३. नानाजातीयानि रम्भाफलानि कीदृशानि? ४. कदल्यः प्राधान्येन केषु देशेषूत्पद्यन्ते? ५. कदलीनां प्रयोजनानि कानि? ६. ताः कथं प्ररोप्यन्ते?

२) प्रयोगं विपरिणमयत—

१) कानिचित् फलानि भक्ष्यमाणानि ज्वरमुत्पादयन्ति ।

२) तस्याः पत्राणि भोजनामत्रत्वेनोपयुज्यते जनैः ।

३) कदल्यः काण्डस्यान्तः काण्डसार उपलभ्यते ।

४) यादृशं बीजमुप्यते तादृशं फलमवाप्यते ॥

३) अतिशायनार्थकैः पदैः वाक्यानि पूरयत—

१) जम्बुकः काकात् ... (पटु) ।

२) भूमौ स्थलभागात् जलभागः .... (बहु) ।

३) भगवान् क्षणोरणीयान् महतो ... (महत्) ।

४) सूर्यापेक्षया चन्द्रो भूमेः ... (अन्तिक) ।

५) चन्द्रापेक्षया सूर्यः ... (दूर) ।

४) उपसर्गविशेषाः—अन्तर्, आविस्, तिरस्, प्रादुस् ।

भू —भवति । अन्तर्भवति, आविर्भवति, तिरोभवति, प्रादुर्भवति ।

अस —अस्ति । आविरस्ति, प्रादुरस्ति ।

कृ —करोति, कुरुते । आविष्करोति । आविष्कुरुते, तिरस्करोति, तिरस्कुरुते ।

धा —दधाति, धत्ते । तिरोदधाति, तिरोधत्ते, अन्तर्दधाति, अन्तर्धत्ते ॥

५) उपसर्गयोगादर्थभेदः—

ईक्ष्—ईक्षते । अपेक्षते, अवेक्षते, उपेक्षते, परीक्षते, प्रेक्षते, प्रतीक्षते, वीक्षते, समीक्षते ॥

६) कृत्प्रत्ययान्ताः—

पच् to cook-(पचति)=पक्वः- पक्ववान् , पचन् , पच्यमानः, पक्त्वा, (विपच्य) पक्तुम् , पक्तव्यम् , पच्यम् ॥

७) पर्यायाः—

कदली ५—कदली वारणबुसा रम्भा मोचांऽशुमत्फला ॥

उद्भिद् *m* plant
ओषधि *f* herb
व्रीहि *m* corn
यव *m* barley
गुण *N. m* quality
वर्ण *N. m* colour

आकार *m* shape
त्वच् *f* skin, bark
भोजनामत्र *n* भोजनपात्र dining plate
सक्तु *m* flour
दोहद *m. n.* manure.



## १३. हंसः

यद्यपि पक्षिणः प्रायेण नभसि डयन्ते तरुशाखासु च निवसन्ति, तथापि हंसादयः केचित् पक्षिणः सलिलवासिनः पृथिवीचारिणश्च दृश्यन्ते। ते बाहुल्येन पद्मिनीषु वसन्ति। मन्दं भूमौ सञ्चरन्ति च। तेषां पक्षौ कोमलौ। अतस्ते डयमानाः सुदूरं गन्तुं न पारयन्ति॥

तेषां गतिमधिकृत्य काचित् कथा श्रूयते, यथा-कदाचिदेकः काको हंसस्य मन्दगामितामुपहसन् सव्याजमवोचत्—'सखे! त्वं डयनेऽत्यन्तं निपुण इति मया बहुशः श्रुतम्। अतस्तव गतिं परीक्षितुमिच्छामि। युगपदस्माद्देशात् प्रस्थितयोरावयोः कतरः प्रथमं सरसः पारं प्राप्नोतीति परीक्षावहे। तत् किमद्य मया सह ग्लहं कर्तुं सज्जोऽसि?-इति। हंसः 'तथा कुर्वः' इति तद्वचनमङ्गीचकार॥

ततस्तावुभावपि युगपत् प्रातिष्ठेताम्। हंसो यावत् पञ्च-षाणि पदानि गच्छति तावत् काको द्रुतं डयमानः सुदूरं जगाम। परं काको द्रुतगत्या नितान्तं श्रान्तः सरसः मध्ये पतित्वा पञ्चत्वं गतः। हंसस्तु मन्दं सञ्चरन् पदे पदे विश्राम्यन् केनचित् समयेन-सरसः पारं प्रापत् ॥

हंसानां गरुतः श्वेताः, इतराण्यङ्गानि तु पीतानि। केषाञ्चन हंसानां चञ्चवश्चरणाश्च लोहिताः। ते राजहंसा इति व्यपदिश्यन्ते। मल्लिकाक्षा अपि हंसभेदा एव। तेषां चञ्चव-चरणाश्च धूम्रवर्णाः। हंसानां स्त्रियो 'हंस्यः' इति 'वरटाः' इति चाभिधीयन्ते ॥

यथा विष्णोर्गरुडस्तथा ब्रह्मणो वाहनं हंस इति पुराणेषु श्रूयते। कवयो हंसान् नीरक्षीरयोः पृथक्करणे शक्तानाहुः। उक्तं च—

हंसः शुक्लो बकः शुक्लः को भेदो बकहंसयोः।
नीरक्षीरविभागे तु हंसो हंसो बको बकः ॥–इति ॥

ईदृशा हंसाः सम्प्रति कुत्रापि नोपलभ्यन्ते जगति। कविभिस्तावदेतादृशानां हंसानां रात्रौ सञ्चारः मानसाख्ये सरसि निवासश्च वर्ण्यते ॥

हंसा बिसाहारा इत्याचक्षते कवयः। अथापि ते बाहुल्येन मत्स्यान् भक्षयन्ति। हंसाः पद्मसरसामलङ्कारभूताः प्रेक्षकाणा-मक्षीण्यावर्जयन्ति ॥

१) प्रश्नाः—१. पक्ष्यन्तराणां हंसादीनां च को भेदः ? हंसानां गतिः कीदृशी ? ३. तामधिकृत्य का कथा श्रूयते ? ४. हंसभेदाः के ? ५. कानि तेषां लक्षणानि ? ६. कविभिरुक्ता हंसाः कीदृशाः ? ७. हंसानामाहारः कः ?

२) प्रयोगान्तरतया विपरिणमयत—

१) हंसाः प्राधान्येन पद्मिनीषु वसन्ति ।

२) कवयो हंसान् नीरक्षीरविभागे शक्तानाहुः ॥

३) निर्दिष्टैर्लकारैः वाक्यानि पूरयत—

१) शुकोऽपि जनैः शिक्षितो राम रामेति ब्रू ... लङ् ।

२) रावणेन पृष्टो हनूमान् रामस्य दूतोऽहमिति आ+चक्ष्-लङ् ।

३) मद्वचनात् त्वं पितरमेवं ब्रू ... लोट् ।

४) उपसर्गयोगादर्थभेदः—

चर्—चरति । अनुचरति, आचरति, उच्चरति, उपचरति, परिचरति, प्रचरति, सञ्चरति ।

लभ्—लभते । आलभते, उपलभते, उपालभते, विप्रलभते ।

५) कृत्प्रत्ययान्ताः—

चक्ष् to tell—(चष्टे) । ख्यातः, ख्यातवान्, चक्षाणः, ख्यायमानः, ख्यात्वा, (आख्याय), ख्यातुम्, ख्यातव्यः, ख्येयः ।

अस् to be—(अस्ति)। भूतः, भूतवान्, सन्, अनुभूयमानः, भूत्वा, (अनुभूय), भवितुम्, भवितव्यम्, भाव्यम्॥

६) अङ्गीकरोति, अलङ्करोति, नमस्करोति, वशीकरोति एतैः पृथक् पृथक्, वाक्यानि रचयत॥

७) एकपदं वदत— १. नितान्तं श्रान्तः। २. नितान्तं पटुः॥

८) पर्यायाः—

हंसः ५—हंसास्तु श्वेतगरुतश्चक्राङ्गा मानसौकसः।

राजहंसस्य लक्षणः—

'राजहंसास्तु ते चञ्चुचरणैर्लोहितैः सिताः॥' इति

---

युगपत् in simultaneously

पार n the other bank

ग्लह m bet

गरुत् m feather

धूम्रवर्णः a smoke [coloured

बकः n crane

बिसाहार a one whose food is lotus stalk

प्रेक्षक a observer,

---



## १४ उष्ट्रः

उष्ट्रो नाम कश्चिद्वक्रकायो जन्तुः। स गज इवात्यन्तं प्रांशुः। तस्यावयवास्तु तनीयांसः। तस्य चरणाः कृशा दीर्घाश्च। कन्धरा त्वायता कुटिला च। पुच्छो ह्रस्वः। उष्ट्राणां पृष्ठभाग एको गडुर्विद्यते। केषाञ्चित्तु द्वौ गडू स्तः। उष्ट्राः सर्वदोर्ध्वमेव पश्यन्ति ॥

इत्थमुष्ट्रो यद्यपि विरूपाकृतिस्तथापि स मनुष्याणामत्यन्तोपकारी जन्तुः। गजो हि गुरुतरान् भारान् वोढुं क्षमते, न तु शीघ्रं गन्तुम्। अश्वस्तावद्द्रुतं गन्तुं शक्नोति, न त्वतिमहतो

भारान् वोढुम् । उष्ट्रस्तु महान्ति भाण्डानि वहन् द्रुततरं गच्छति । चित्रेऽस्मिन्नेकः पुरुषः उष्ट्रस्योपरिष्टादुपविष्टः । कदाचित् पञ्चषा अपि जना उष्ट्रमारूढाः सञ्चरन्ति ॥

सन्ति खल्वारभादिदेशेषु समुद्रवदतिविशाला अदृश्यमान सीमानो मरुभूमयः; यत्र हि गृहाणां नदीनां कूपानां वृक्षाणां च कथाऽपि न विद्यते, तत्रोष्ट्राः केवलं सञ्चारार्थमुपयुज्यन्ते। उष्ट्राः खलु बहून् दिवसान् निराहाराः सञ्चरितुं शक्ताः। प्रस्थानकाले ते पञ्चषेभ्योः दिवसेभ्यः पर्याप्तं जलं पिबन्ति। अतः समुद्रेषु महानौका इव मरुभूभागेषु सञ्चरतां जनानामुष्ट्रा एवाश्रयाः। अत एवारभीयाः सार्थवाहा उष्ट्रान् स्तुत्या गीत्या चोपगायन्ति ॥

उष्ट्राः प्राधान्येन निम्बपत्राण्यश्नन्ति। कण्टकवृक्षेषु तेषां महती प्रीतिः। उष्ट्राणां शावकाः 'करभा' इत्यभिधीयन्ते। कलभास्तु करिशावकाः ॥

---

१) प्रश्नाः—कथमुष्ट्रो विरूपाकृतिः? २. कथं स मनुष्याणामत्यन्तोपकारी जन्तुः? ३. कस्मादारभीया उष्ट्रान् स्तुत्या गीत्या चोपगायन्ति? ४. उष्ट्राः किं भक्षयन्ति? ५. करभाः कलभाश्च के?

२) प्रयोगं विपरिणमयत—

१) गजा गुरुतरान् भारान् वहन्ति।

२) उष्ट्रा बहून् दिवसान् निराहाराः सञ्चरितुं शक्नुवन्ति।

३) ते पञ्चषेभ्यो दिवसेभ्यः पर्याप्तं जलमेकदैव पिबन्ति ॥

३) निर्दिष्टानां धातूनां लटो रूपैः वाक्यानि पूरयत—

१) यस्मान्मद्वचनमनुष्ठितं तस्माच्छ्रेयः (अवाप्) .. ।
२) सर्वे वेदाः सर्वाणि च शास्त्राणि ते (प्रति + भा) ... ।
३) अन्यस्तु प्रथमेन यद्याचितं ततो द्विगुणं (लभ्) ... ।
४) भो, सखे, अहं कर्णमधुरं ते गानं (श्रु)... ।

४) अतिशायनार्थकानि विशेषरूपाणि—

| | | |
|---|---|---|
| तनुः | तनीयान् | तनिष्ठः । |
| स्थूलः | स्थवीयान् | स्थविष्ठः । |
| कृशः | क्रशीयान् | क्रशिष्ठः । |
| लघुः | लघीयान् | लघिष्ठः । |
| गुरुः | गरीयान् | गरिष्ठः । |
| ह्रस्वः | ह्रसीयान् | ह्रसिष्ठः । |
| दीर्घः | द्राघीयान् | द्राघिष्ठः । |

५) कृत्प्रत्ययान्ताः—

वह् to carry—(वहति) ऊढः, ऊढवान्, वहन्, उह्यमानः, ऊढ्वा, (समुह्य) वोढुम्, वोढव्यम्, वहनीयम् ।

रुह् to grow—(रोहति) । रूढः, रूढवान्, रोहन्,— रूढ्वा, रोढुम्, रोढव्यम्, रोहणीयम् ॥

६) एकपदीकुरुत—अत्यन्तं प्रांशुः, अतीव गुरुः, अतीव द्रुतम् ॥

७) पर्यायाः— उष्ट्रः ४—उष्ट्रे क्रमेलक मय, महाङ्गाः:— 'करभः' शिशुः उष्ट्राणां वृन्दम् ' = औष्ट्रकम ॥

उष्ट्र *m* camel
काय *m* body
कृश *a* lean
आयत *a* long
ककुद *m* hump
प्रांशुः *a* high, tall

मरुभूमि *f* desert
करभ *m* young camel
कलभ *m* young elephant
आरभीय *n* Arab
निम्ब *n* margo-tree
कण्टकवृक्ष *n* Thorny tree



## १५. महात्मा दधीचः

कालेया नाम दानवाः पुरा वृत्रं समाश्रित्य त्रिविष्टपं पीडयामासुः। तान् हन्तुमशक्नुवन्तः शक्रादयो देवाः परिम्लान-मुखश्रियो ब्रह्माणमुपेत्य हृदयङ्गमैः स्तवैस्तं तुष्टुवुः। अथ पुरस्तादाविर्भूताय तस्मै दानवभयं निवेद्य तमन्वयुञ्जत-'भगवन् किमत्र करवामहै' इति। ब्रह्माऽब्रवीत्—'वत्साः, मा बिभीत।

दधीचमृषिं गत्वा तस्यास्थीनि गृह्णीत । तैश्च वज्रं कृत्वा तेन वृत्रं हत ' इति ॥

तद्वचनमनुसृत्य देवाः सद्य एव दधीचस्याश्रमं गत्वा नत्वा च तं तदीयान्यस्थीन्ययाचन्त । तेषामभ्यर्थनया स महर्षिः प्रहर्षमगात् । आत्मनः शरीरलाभं बहुमन्यत । स्वीयं तपः फलितमाकलयत् । सद्य एव स महात्मा त्रैलोक्यस्य हिताय आत्मनः प्राणानुत्ससर्ज । परासोस्तस्यास्थीन्यादाय देवास्त्वष्ट्रा वज्रं कारयामासुः ॥

तदनु शक्रपुरोगमाः सुमनसो रोदसी आवृत्य तिष्ठन्तं कालेयैरभिरक्षितुं वृत्रमभ्ययान् । तैः सह देवानां तुमुलमायोधनं प्रावर्तत । रजोभिः सर्वाः ककुभो व्याप्यन्त । सर्वे लोका अकम्पन्त । एवं भूते व्यतिकरे विष्णुतेजसाऽऽविष्टो जिष्णुरेकाकी रणधुरां वहन् वृत्रस्य शिरसि वज्रमपातयत् । वृत्रो भग्नशिराः क्षितावपतत् । देवाः समाश्वसन् । इन्द्रो 'वृत्रहा' इति प्रथां प्राप्नोत् ॥

१) प्रश्नाः-१. शक्रादयो देवाः किन्निमित्तं ब्रह्माणमुपायन्, किञ्च तमन्वयुञ्जत ? २. ब्रह्मा किमब्रवीत्? ३. देवाः किमकुर्वन्?
४. दधीचः किमकरोत्? ५. देवाः किं चक्रुः ?
६. ते कमभ्यायन् ? ७. ततः किमासीत् ?

२) प्रयोगं विपरिणमयत—

१. भगवन् किमत्र करवामहै ।
२. दधीचमृषिं गत्वा तस्यास्थीनि गृह्णीत ।
३. तैश्च वज्रं कृत्वा तेन वृत्रं हत ॥

३) निर्दिष्टैर्लकारैः वाक्यानि पूरयत—

१. ब्रह्मा परिम्लानमुखश्रियो देवान् अनु + युज्....(लङ्)।

२. शक्रपुरोगमा देवा दधीचमृषिं गत्वा तस्यास्थीनि ग्रह्-(लङ्)।

३) सं+आ+श्वस् (लोट्) भवन्तः, युष्माकं पीडा नश्... (लट्)॥

४) उपसर्गयोगादर्थभेदः—

आप्—आप्नोति, अवाप्नोति, समाप्नोति, प्राप्नोति, व्याप्नोति।

श्वस्—श्वसिति। आश्वसिति, निःश्वसिति, विश्वसिति।

सृ—सरति। अनुसरति, अपसरति, उपसरति, निःसरति, परिसरति, प्रसरति॥

५) कृत्प्रत्ययान्ताः—

श्रि (to approach)—(श्रयति, श्रयते)=श्रितः, श्रितवान्, श्रयन्, श्रयमाणः, श्रियमाणः, श्रित्वा, (आश्रित्य) श्रयितुम्, श्रयितव्यम्, श्रयणीयम्।

सृ (to move)-(सरति)-सृतः, सृतवान्, सरन्, अनुस्रियमाणः, सृत्वा, (अनुसृत्य) सर्तुम्, सर्तव्यम्, सरणीयम्।

स्तु (to praise)—(स्तौति, स्तवीति)=स्तुतः, स्तुतवान्, स्तुवन्, स्तूयमानः, स्तुत्वा, (संस्तुत्य), स्तोतुम्, स्तोतव्यम्, स्तवनीयम्।

नम् (to salute)—नमति=नतः, नतवान्, नमन्, नम्यमानः, नत्वा, (प्रणम्य) नन्तुम्, नन्तव्यम्, नम्यम्॥

६) पर्यायाः—

असुरः १०—असुरा दैत्य दैतेय दनुजेन्द्रारि दानवाः।
शुक्रशिष्याः दितिसुताः पूर्वदेवाः सुरद्विषः॥

महात्मा *a* महाशयः=उदारचित्तः, दयालुः, noble minded

त्रिविष्टप *n* heaven
परिम्लान *a* faded; withered
हृदयङ्गम *a* attractive
दानव *m* demon
अन्वयुञ्जत *A* युज् with अनु asked, questioned
अस्थि *n* bone
वज्र *n* thunderbolt
परासु *a* devoid of life
त्वष्ट्र *m* divine architect
शक्रपुरोगम *a* headed by Indra
सुमनस् *m* god
रोदसी *n* sky and earth
तुमुल *a* fierce
आयोधन *n* battle
ककुभ् *f* direction, quarter
व्यतिकर *m* occurance
जिष्णु *m* Indra
रणधुरा *f* brunt of the battle
वृत्रहन् *m* Indra, the destroyer of वृत्र

---

## १६. मधुकराः

मधु स्वदन्तो मधुरं स्वनन्तः
सुमात् सुमं सभ्रमदं भ्रमन्तः ।
मधुव्रताः पुष्परजोविकीर्णाः
सौन्दर्यसारा इव भान्ति सृष्टेः ॥ १

गुञ्जन्ति गायन्ति परिभ्रमन्ति
माद्यन्ति मज्जन्ति सुमोदरेषु ।
लिहन्ति सौमं मधु विद्रवन्ति
मिलन्ति खेलन्ति च मत्तचित्ताः ॥ २

उच्चावचं पुष्परसं निपीय
निधाय चैनं मधुकोशपत्रे ।
तन्वन्ति तावत् स्वयमात्मतृप्तिं
धिन्वन्ति पश्चाद्भुवनं च तेन ॥ ३

बालाः षडङ्घ्रीननुकृत्य नित्यं
नानाविधात् पुस्तकपुष्पवृन्दात् ।
सञ्चिन्वते ज्ञानरसं रसाग्र्यं ॥
सम्मोदयन्ते च जगत् समग्रम् ॥ ४

---

१) प्रश्नाः—१. मधुव्रताः क इव भान्ति? २. ते किं कुर्वन्ति ?
३. मधुव्रताः स्वयं किं लभन्ते ? ते पश्चात् किं कुर्वन्ति ?
५. बालाः षडङ्घ्रीननुकृत्य किं कुर्वन्ति ?

२) शत्रन्तैः पदैः वाक्यानि पूरयत—
१. वसन्ते चूताङ्कुरान् ( सु+अद् ) पिकाः मधुरं गायन्ति ।
२) रामकथानादं (श्रु) कः परां मुदं न याति ।
३. मधुकराः पुष्पेभ्यो मधु (लिह्)...मधुरं गुञ्जन्ति ॥

३) प्रयोगं विपरिणमयत—
१. बालाः षडङ्घ्रीननुकुर्वन्ति, पुस्तकपुष्पात् रसं सञ्चिन्वन्ति च । २) मधुकराः पुष्पेभ्यो मकरन्दं लिहन्ति, परेषां तृप्तिं तन्वन्ति च ।

४) उपसर्गयोगादर्थभेदः—
चि—चिनोति, चिनुते, निश्चिनोति, परिचिनोति, विचिनोति।
सञ्चिनोति—एवमात्मनेपदेऽपि द्रष्टव्यम् ।
मद्—माद्यति । उन्माद्यति, प्रमाद्यति ॥

५) कृत्प्रत्ययान्ताः—

लिह् to lick—(लेढि, लीढे)। लीढः, लीढवान्, लीढन्, लिहानः, लिह्यमानः, लीढ्वा, (अवलिह्य) लेढुम्, लेढव्यम्, लेहनीयम्, लेह्यम् ॥

६) गृह्णन्, चिन्वन्, तन्वन्, वृण्वन्, शृण्वन्, वृणन्,—एषां शत्रन्तानां लटि प्रथमपुरुषैकवचने रूपाणि निर्दिशत ॥

७) पर्यायाः—

मधु ३—मधु क्षौद्रं माक्षिकम्...

मधुकरः ९—मधुव्रतो मधुकरो मधुलिण्मधुपालिनः।
द्विरेफपुष्पलिड्भृङ्ग षट्पदभ्रमरालयः ॥

मकरन्दः ४—मकरन्दः पुष्परसः परागः सुमनोरजः ॥

---

मधु *n*, मकरन्द *m* } Honey
सुम *a* flower
मधुव्रत *m* bee
पुष्परजोविकीर्णः *a* besmeared with pollen
सौन्दर्यसार *m* essence of beauty
गुञ्जन्ति *P.* hum
मज्जन्ति *P.* dive into
सुमोदर *n* the inner part of a flower
लिहन्ति *P.* lick
सौम *a* pertaining to a flower
विद्रवन्ति *P.* go away
मिलन्ति *P.* assemble together
उच्चावच *a* various
मधुकोश *m* bee hive
तावत् *in.* firstly, before doing anything else
धिन्वन्ति *P.* please
षडङ्घ्रि *m* bee
सञ्चिन्वते *A* gather
रसाग्रय *a* the best of रस
लघुडाहति *f* the stroke of a stick.



## १७. नगरम्

किं नाम नगरम्? यत्र सहस्रशो जनानामधिवासः, नैकविधानां गृहाणां श्रेणयः, विविधा राजकीयाः कार्यालयाः विविधविद्याग्रहणोपयुक्ता विद्यालयाः, नानाविधैः क्रय्यैर्वस्तुभिरलंकृताः पण्यवीथिकाश्च विद्यन्ते तन्नगरम्। नैकविधा देवालयाः, पुष्पोद्यानानि, प्रमदवनानि, कूपाः, तटाकानि, अन्यान्यपि जनानामुपयुक्तानि तानि वस्तूनि नगरेषु सुलभानि। यद्यपि ग्रामवासः सुखतरस्तथापि पत्तनेषु विद्याया व्यवसायस्य

वाणिज्यस्य च सम्पत्तावस्ति सौकर्यातिशयः। प्रधानभूताः जीविकार्जनोपायाः सर्वे नगरेष्वेव सुलभाः। अतोऽद्यत्वे जनाः प्रायेण ग्रामान् परित्यज्य नगराण्यधिवसितुमिच्छन्ति ॥

नगराणि नानाविधैः सुधालिप्तैर्भवनैरुपशोभन्ते। पञ्चषाभिर्भूमिकाभिरुपनिबद्धान्युन्नतानि भवनानि मुम्बा, दिल्ली वाराणसी, कालिघट्ट, मद्रपुरी प्रभृतिषु प्रधाननगरेषूपलभ्यन्ते। अमेरिकाखण्डे केषुचिन्नगरेषु विंशत्या त्रिंशता वा भूमिकाभिरलंकृतान्यभ्रंलिहानि रम्याणि हर्म्याणि समुल्लसन्ति। भारतवर्षीयेषु नगरेष्वेतादृशानि वेश्मानि दुर्लभान्येव। तत्रापि ग्रामेषु प्रायेण कुटीरकल्पान्यल्पीयांस्येव गृहाणि निर्मीयन्ते ॥

चित्रमवलोक्यताम्—नगरस्यैका रथ्या तत्र दृश्यते। रथ्यायाः पार्श्वे केचिद्गृहाः समलोक्यन्ते। यद्यपि ते नातीवोन्नतास्तथापि सुधाधवलाः पवनप्रवेशक्षमैर्वातायनैरुपेताः शुचयः सुन्दराश्च वर्तन्ते। एतादृशेषु गृहेषु वसन्तो जनाः पुरवाससुलभैरामयैर्न परिभूयेरन्। रथ्याया परिसरे केचिद्दीपस्थाणवो दृश्यन्ते, येषु निशामुखे दीपाः प्रज्वाल्यन्ते। तेन तत्र जनानां रात्रौ सञ्चारः सुकरो भवति। अद्यत्वे नगराणि प्रायेण विद्युत्प्रदीपैरुद्द्योतन्ते ॥

नगरेषु गतागतार्थं जनैर्विविधानि वाहनान्युपयुज्यन्ते। वृषभशकटमश्वशकटं च सर्वसाधारणं वाहनम्। धनिनस्तु भूयस्तया पाश्चात्यदेशीयानि यानान्युपयुञ्जते। ग्रामेषु वसतां जनानामीदृशानि सौकर्याणि दुर्लभानि ॥

१) प्रश्नाः—१. ग्रामापेक्षया नगरेषु कीदृशाः सौकर्यातिशयाः? २. नगरेषु कीदृशानि गृहाणि विद्यन्ते? ३. चित्रे किमवलोक्यते? ४. कीदृशानि सौकर्याणि ग्रामेषु दुर्लभानि?

२) प्रयोगं विपरिणमयत—

१) अद्यत्वे जनाः नगराण्यधिवस्तुमिच्छन्ति ।
२) चित्रेऽस्मिन् नगरस्यैका रथ्या दृश्यते ।
३) रथ्यायाः पार्श्वे केचिद्गृहा अवलोक्यन्ते ॥

३) वसति, अधिवसति—अनयोः प्रयोगे विशेषं दर्शयत ॥

४) कृत्प्रत्ययान्ताः—

लिप् to overspread—(लिम्पति)=लिप्तः, लिप्तवान्, लिम्पन्, लिप्यमानः, लिप्त्वा, (विलिप्य) लेप्तुम्, लेप्तव्यम्, लेपनीयम् ।

वस् to dwell—(वसति)=उषितः, उषितवान्, वसन्, उष्यमानः, उषित्वा, (अध्युष्य) वस्तुम्, वस्तव्यम्, वसनीयम् ॥

५) अतिशायनार्थकानि विशेषरूपाणि—

| | | |
|---|---|---|
| वृद्धः | ज्यायान् / वर्षीयान् | ज्येष्ठः / वर्षिष्ठः |
| युवा | यवीयान् / कनीयान् | यविष्ठः / कनिष्ठः |
| अल्पः | अल्पीयान् / कनीयान् | अल्पिष्ठः / कनिष्ठः |

६) विंशतिः, त्रिंशत्, चत्वारिंशत्, पञ्चाशत्, षष्टिः, सप्ततिः, अशीतिः, नवतिः, शतम्—एतैः वाक्यानि रचयत ॥

७) पर्यायाः—

नगरम् ५—पूः (स्त्री) पुरीनगर्यौ वा पत्तनं पुटभेदनम्।
आपणः ४—आपणस्तु निषद्यायां विपणिः पण्यवीथिका॥
सुन्दरम् १२—सुन्दरं रुचिरं सुषमं साधु शोभनम्।
कान्तं मनोरमं रुच्यं मनोज्ञं मञ्जु मञ्जुलम्॥

क्रय्य *a* merchandise
पुष्पोद्यान *n* flower garden
प्रमद्वन *n* pleasure garden
श्रेणयः Rows
व्यवसाय *m* industry
वाणिज्य *n* trade
सम्पत्ति *f* accomplishment
सौकर्य *n* convenience
जीविका *f* livelihood
अद्यत्वे *in.* now-a-days
सुधालिप्त *a* whitewashed
भूमिका *f* storey, stair
अभ्रंलिह *a* touching the sky
कुटीरकल्प *a* nearly equal to a hut
वातायन *n* window
आमय *m* disease
रथ्या *f* Road
निशामुख *n* beginning of night
विद्युत्प्रदीप *m* electric light
पाश्चात्यदेशीय *a* of western countries
यान *n* Vehicle.

---

## १८. आहारः

अस्त्यस्माकमुदरे विलक्षणः कश्चिदग्निः, योऽन्तः स्थितः शरीरमखिलमुष्णायति। तस्य चाग्नेरिन्धनमाहारो भवति। आहार एव रक्तमांसरूपेण परिणतो देहस्य बलं जनयति॥

सोऽयमाहारः सात्त्विकः, राजसः, तामस इति त्रिविधः। सात्त्विको नाम रस्यः स्निग्धो मधुरः शुचिश्च। स चायुः सत्त्वं बलं बुद्धिं सुखमारोग्यं च पुष्णाति॥

राजसो नामातिकटुरत्यम्लोऽत्युष्णस्तीक्ष्णो रूक्षो विदाही च। स च शौर्यमहङ्कारं दार्ढ्यं कामं क्रोधं शोकं चोत्पादयति॥

तामसस्तु यातयामो गतरसः पूतिः पर्युषितो जुगुप्सितश्च। अयमेव राक्षसाहारो नाम। अयमाहारो मनुष्याणां मदं मात्सर्यमभिमानमहङ्कारं दम्भं च तनोति॥

यथा हि दुष्टो वायुः अशुद्धं जलं च नानाविधानामामयानां प्रभवो भवति तथैव कुत्सित आहारोऽपि। तस्मात् सात्त्विक एवाहारः प्रशस्ततमः। सैनिकास्तु राजसमप्याहारं गृह्णन्तो न दुष्यन्ति। तामस आहारस्तु सर्वथैव त्याज्यः॥

भारतीया वयं शाल्यन्नमश्नीमः। यौरोपास्तु गोधूमं बाहुल्येनोपयुञ्जते। शाल्यन्नापेक्षया मुद्गो माष आढको गोधूमश्च बलकारी भवति। ऋषयः कन्दैर्मूलैः फलैः पर्णैरद्भिश्च जीवन्ति॥

अत्यधिकमत्यल्पं च न भोक्तव्यम्। अत्यल्पभोजनमग्निं ज्वलयितुं न पर्याप्नोति। अत्यधिकं भोजनमजीर्यत् अग्निं मन्दी करोति। तस्मान्मितमेव भोजनं हितकारि भवति। यावता भुक्तेन क्षुन्निवृत्तिर्जायेत तावदेव भोक्तव्यम्। तदेव मितभोजनं नाम। केचित्त्वपेक्षितादधिकं भुञ्जते। बुद्धिमन्तस्तु न भोजनार्थं जीवन्ति, किन्तु जीवनार्थं भुञ्जते॥

---

१) प्रश्नाः—१. त्रिविधा आहाराः के? २. तेषां गुणाः कीदृशाः? ३. कुतः सात्विक एवाहारः प्रशस्ततमः? ४. शाल्यन्नापेक्षया के बलकारिणः? ५ कस्मादत्यधिकमत्यल्पं च न भोक्तव्यम्? ६. मितभोजनं नाम किम्?

२) प्रयोगं विपरिणमयत

१) स आयुः सत्वं बलं बुद्धिं सुखमारोग्यं च पुष्णाति ।

२) अयं मनुष्याणां मदं मात्सर्यमभिमानमहङ्कारं च तनोति ।

३) केचिदपेक्षितादधिकं भुञ्जते ॥

३) अतिशायनार्थकैः पदैः वाक्यानि पूरयत—

१) राजसादाहारात् सात्विक आहारः (प्रशस्तः) ।

२) गुडापेक्षया शर्करा (मधुर) ।

३) पक्षिणां मध्ये हंसः (चारु) ॥

४) यन्, यान्, घ्नन्, वध्नन्, लिम्पन्—एषां शत्रन्तानां लटि प्रथमपुरुषैकवचने रूपाणि निर्दिशत ॥

५) कृत्प्रत्ययान्ताः—

भुज् to enjoy—(भुङ्क्ते)=भुक्तः, भुक्तवान्, भुञ्जानः, भुज्यमानः, भुक्त्वा, (उपभुज्य), भोक्तुम्, भोक्तव्यः, भोजनीयः, भोज्यः ।

युज् to unite—(युङ्क्ते) = युक्तः, युक्तवान्, युञ्जानः, युज्यमानः, युक्त्वा, (प्रयुज्य), योक्तुम्, योक्तव्यम्, योजनीयम्, योज्यम् ।

त्यज् to abandon—(त्यजति)=त्यक्तः, त्यक्तवान्, त्यजन्, त्यज्यमानः, त्यक्त्वा, (परित्यज्य) त्यक्तुम्, त्यक्तव्यः, त्यजनीयः, त्याज्यः ।

भुज् to worship—(भजति)=भक्तः, भक्तवान्, भजन्, भज्यमानः, भुक्त्वा, (विभज्य), भुक्तुम्, भक्तव्यम्, भजनीयम् ॥

६) पर्यायाः—

आहारः ३—भोजनं जग्धिराहाराः ।

कवलः १—ग्रासस्तु कवलः पुमान् ॥

उदरम् ५—पिचण्डः कुक्षिरुदरं तुन्दं च जठरोऽस्त्रियाम् ।

विलक्षण *a* strange, extra-ordinary
इन्धन *n* fuel
रस्य *a* juicy, sapid
स्निग्ध *a* oily
अतिकटु *a* very pungent or acrid
अत्यम्ल *a* very sour
तीक्ष्ण *a* hot
रूक्ष *a* astringent
विदाहिन् *m* causing inflammation
यातयाम *a* stale, used
पूति *a* foul smelling
पर्युषित *a* not fresh
जुगुप्सित *a* detested
प्रभव *m* source
शाल्यन्न *n* rice
गोधूम *m* wheat
मुद्ग *m* green-gram
माष *m* pulse; black-gram
आढक *m* dhal
कन्द *n* bulbous root
क्षुध् *f* hunger

## १९. समुद्रः प्रवहणं च

समुद्रो नामातिविस्तीर्णोऽदृश्यमानपारः सुतरां अगाधोऽम्भसां राशिः। स च क्वचित् क्वचित् क्रोशत्रयमगाधो वर्तते। समुद्रेषु वात्योत्पादितास्तरङ्गाः सततमुद्द्रवन्ति। अतस्ते दुरवगाहाः ॥

समुद्रेषु नैकविधानि यादांसि प्रतिवसन्ति। भूमौ निवसतां प्राणिनां मध्ये गजा एव गरिष्ठा बलिष्ठाश्च। अब्धौ तु ततोऽपि महीयांसो बलीयांसश्च तिमिङ्गलाख्या जलचराः सन्ति। ते तदा तदा जलस्योपरि प्लवमानाः सांयात्रिकाणां द्वीपभ्रममुत्पादयन्ति। शश्वच्च वालप्रहारेण ते महानौका अपि मज्जयन्ति॥

नानाविधा महान्तो मत्स्याः सागरे विद्यन्ते। धीवराः प्लवैः सागरं प्रविश्य जालैस्तान् बध्नन्ति। मूल्यवन्ति रत्नानि प्रवालानि मुक्ताफलानि च समुद्रेषु जायन्ते। अत एव तेषां रत्नाकरव्यपदेशः ॥



वयं नदीर्नौकाभिस्तरामः। पारावारास्तु कल्लोलैराकुलाः नौभिस्तरीतुं न शक्याः। अतस्तत्र प्रवहणैः सञ्चरन्ते जनाः। प्रवहणेषु कानिचिद्वायुना नीयमानानि, कानिचिद्बाष्पशक्त्या चाल्यमानानि च। यथैव स्थले बाष्पशकटानि तथैव जले बाष्पप्रवहणान्युपयुज्यन्ते ॥

वायुना प्रेर्यमाणं प्रवहणं कदाचिद्वात्याभिहतं निमज्जेदपि। वाष्पप्रवहणेषु सञ्चरतां जनानां नैतादृशं महद्भयं विद्यते। वाष्पप्रवहणानि स्तम्भदीपैः निर्दिश्यमानमार्गाण्येकस्यां होरायां विंशत्यधिकान् क्रोशान् प्रयान्ति। अतो वाष्पप्रवहणेषु प्रयान्तो जनाः सुदूराण्यपि द्वीपान्तराणि कतिपयैरेव दिवसैः प्राप्तुं शक्नुवन्ति॥

---

१) प्रश्नाः—१. को नाम समुद्रः? कुतः समुद्राः दुरवगाहाः?
   २. समुद्रेषु कीदृशानि यादांसि प्रतिवसन्ति? ३. कुतस्तेषां रत्नाकरव्यपदेशः? ४. तत्र कैः सञ्चरन्ते जनाः?
   ५. द्वीपान्तराणि अतिशीघ्रं प्राप्तुं कथं शक्नुवन्ति जनाः?
   ६. केषु सञ्चरतां जनानां भयं जायते? केषु न?

२) निर्दिष्टानां क्रियापदानां णिजन्तरूपैः वाक्यानि पूरयत—
   १ वात्या समुद्रेषु पर्वतोन्नतांस्तरङ्गान् ... (उत्पद्यते)।
   २. तिमिङ्गिलाः समुद्रेषु सञ्चरतां भयं ... (जायते)।
   ३. प्रवहणानि जनान् खण्डान्तराणि ... (प्राप्नोति)॥

३) अतिशायनार्थकैः पदैः वाक्यानि पूरयत—
   १. जलाशयेषु समुद्रः ... (पृथु)।
   २. तिमिङ्गिलेभ्यस्तिमिङ्गिलगिलाः ... (बलवत्)।
   ३. पर्वतेषु हिमालयः ... (स्थूल)॥

४) समानार्थकाः—सुतराम्, नितराम्, अतितराम्॥

५) उपसर्गयोगादर्थभेदः—
   मज्ज्—मज्जति। उन्मज्जति, निमज्जति।
   तॄ—तरति। अवतरति, वितरति, उत्तरति, निस्तरति॥

5

६) कृत्प्रत्ययान्ताः—

तॄ to cross-(तरति)=तीर्णः, तीर्णवान्, तरन्, तीर्यमाणः, तीर्त्वा, (अवतीर्य), तर्तुम्, तरितुम्, तरीतुम्, तर्तव्यम्, तरितव्यम्, तरीतव्यम्, तरणीयम्, तार्यम्।

कॄ to scatter—(किरति)=कीर्णः, कीर्णवान्, किरन्, कीर्यमाणः, कीर्त्वा (विकीर्य), कर्तुम्, करितुम्, करीतुम्, कर्तव्यम्, करितव्यम्, करीतव्यम्, करणीयम्, कार्यम्॥

७) पर्यायाः—

समुद्रः १५—समुद्रोऽब्धिरकूपारः पारावारः सरित्पतिः।
उदन्वानुदधिः सिन्धुः सरस्वान् सागरोऽर्णवः।
रत्नाकरो जलनिधिः यादः पतिरपां पतिः॥

नदी १२—नदी सरित्।
तरङ्गिणी शैवलिनी तटिनी ह्रादिनी धुनी।
स्रोतस्वती द्वीपवती स्रवन्ती निम्नगापगा॥

---

कोश *m* two miles
वात्या *f* strong wind
तरङ्ग *m* Wave
यादस् *n* Water-animal
अब्धि, पारावार } *m* Ocean
तिमिङ्गिल *m* a kind of fish which swallows a तिमि
सांयात्रिक *m* merchant trading by sea
शश्वत् *in* often
वालप्रहार *f* stroke of [tail
महानौका *f* a big ship
धीवर *m* fisherman
प्लव *m* raft
प्रवाल *m* विद्रुम coral
मुक्ताफल *n* मौक्तिकं pearl
कल्लोल *m* high wave
प्रवहण *n* vessel
स्तम्भदीप *m* Light house
होरा *f* an hour.



## २०. शकटम्

अत्रैकं शकटं व्रजति। इदं वृषभशकटम्। यदश्वैरुह्यते तदश्वशकटम्। यद्बाष्पशक्त्या गच्छति तद्बाष्पशकटम्। तस्यैव धूमशकटमिति नामान्तरम्। केषुचिद्देशेषु श्वानोऽपि शकटानि वहन्ति। क्वचिन्महिषा अपि शकटेषु बध्यन्ते॥

शकटेऽस्मिन् द्वौ वृषभौ नियुक्तौ। केषुचिच्छकटेष्वेकोऽपि वृषभो नियुज्यते। पश्य, शकटस्य द्वे चक्रे स्तः। चक्रं परितः स्थितो भागः नेमिरित्युच्यते। चक्रयोर्मध्ये मण्डलाकारेण दृश्यमानो भागश्चक्रनाभिः। नेमेश्चक्रनाभेश्चान्तराले द्वादशारः

प्रोताः सन्ति। प्रायेण चक्राणि द्वादशाराणि क्रियन्ते चक्रद्वयस्य नाभिरन्ध्रयोस्तिर्यगक्षदण्डः सङ्घटितः। तस्मिन्नक्ष-दण्डे शकटस्य भारस्तिष्ठति ॥

वृष्टेरातपस्य च वारणाय शकटं कटमयेन पटलेनाच्छाद्यते। तेन शकटं जनानां सञ्चाराय योग्यं भवति। बहवो जनाः शकटैर्गतागतं कुर्वन्ति। भारवन्ति भाण्डान्यपि शकटमारोप्य देशाद्देशं नयन्ति। अद्यत्वे तु भूयस्तया वाष्पयानैरेव गतागतं कुर्वन्ति जनाः ॥

चित्रमवलोक्यताम्! तत्र शकटस्य पुरोभागे स्थितो बालः शाकटिकः। स रथ्यायां शकटं नयति। यदा स शकटं शीघ्रं नेतुमिच्छति तदा कशया वृषौ ताडयति। तदा तौ द्रुतं गच्छतः। यदा शकटं स्थापयितुमिच्छति तदा स नासारज्ज्वा वृषौ पश्चादाकर्षति। तदा तौ तिष्ठतः ॥

अयं शाकटिकः पूर्वमतीव दरिद्र आसीत्। तदा स कस्यचिद्धनिनो गृहे कर्म कुर्वन् प्रत्यहं केवलमाणकचतुष्कं वेतनमलभत। अथापि स बुद्धिमान्; यतः स लब्धस्यार्धं स्वजीविकायै व्ययीकुर्वन्नपरमर्धं रक्षति स्म। तथा रक्षितं च तद्धनं वर्षद्वयेन रूप्यकशतम् अभवत्। पश्चादसौ बालस्तेन धनेनेदं शकटमिमौ वृषभौ चाक्रीणात्। सम्प्रत्ययं प्रतिदिनं द्वित्राणि रूप्यकाण्यर्जयन् सुखेन जीविकां निर्वर्तयति ॥

---

१) प्रश्नाः—१. के शकटानि वहन्ति? २. शकटस्यावयवाः के?

३. शकटस्य प्रयोजनं किम्? ४. शकटस्य पुरोभागे स्थितः कः? ५. स कथं शकटं नयति? ६. कथं स्थापयति?

७. इमं शाकटिकमधिकृत्य किं जानीध्वे?

२) प्रयोगं विपरिणमयत—

१. यदश्वैरुह्यते तदश्वशकटम्।

२. क्वचिन्महिष्या अपि शकटेषु बध्यन्ते।

३. असौ बाल इदं शकटमिमौ वृषभौ चाकीणात्॥

३) शानजन्तैः पदैः वाक्यानि पूरयत—

१. दधीचः आत्मनः शरीरं बहुमन् ... प्राणान् विजहौ।

२. आरुणिः क्लिश् ... कञ्चिदुपायमपश्यत्।

३. पिकः सहकारस्य शाखायां आस् ... मधुरं कूजति।

४. गुरोराज्ञां कृ .... शिष्याः श्रेयांसि विन्दन्ते॥

४) कृत्प्रत्ययान्ताः—

नी to carry—(नयति, नयते)=नीतः, नीतवान्, नयन्, नीयमानः, नीत्वा, (अनुनीय), नेतुम्, नेतव्यम्, नयनीयम्, नेयम्।

लभ् to get—(लभते)=लब्धः, लब्धवान्, लभमानः, लभ्यमानः, लब्ध्वा, (उपलभ्य), लब्धुम्, लब्धव्यम्, लभनीयम्, लभ्यम्॥

४) उपसर्गयोगादर्थभेदः—

बन्ध्—बध्नाति। अनुबध्नाति, उद्बध्नाति, निर्बध्नाति, प्रतिबध्नाति, सम्बध्नाति, आबध्नाति॥

६) पर्यायाः—

यानम् ५—सर्वं स्याद्वाहनं यानं युग्मं पत्रं च धोरणम् ।
सर्वतः ४—समन्ततस्तु परितः सर्वतो विष्वगित्यपि ॥

| | |
|---|---|
| बाष्प *m. n* vapour, steam | तिर्यक् *in.* horizontal |
| नेमि *n* the circumference of a wheel | अक्षदण्ड *m* axle |
| अर *m* spoke | कट *m* mat |
| प्रोत *a* fastened | पटल *n* roof |
| | वेतन *n* wage. |

## २१. दैवं पुरुषकारश्च

दैवं फलति सर्वत्र न विद्या न च पौरुषम् ।
पाषाणस्य कुतो विद्या येन देवत्वमागतम् ॥

तथापि तावत्—

न दैवमिति सञ्चिन्त्य त्यजेदुद्योगमात्मनः ।
अनुद्योगेन कस्तैलं तिलेभ्यः प्राप्तुमर्हति ॥
यथा ह्येकेन चक्रेन न रथस्य गतिर्भवेत् ।
तथा पुरुषकारेण विना दैवं न सिध्यति ॥
उद्यमेनैव सिध्यन्ति कार्याणि न मनोरथैः ।
न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखं मृगाः ॥
विहाय पौरुषं यो हि दैवमेवावलम्बते ।
प्रासादसिंहवत् तस्य मूर्ध्नि तिष्ठन्ति वायसाः ॥

नात्युच्चशिखरो मेरुर्नातिनीचं रसातलम् ।
व्यवसायद्वितीयानां नाप्यपारो महोदधिः ॥ ६

उद्योगिनं पुरुषसिंहमुपैति लक्ष्मी
दैवेन देयमिति कापुरुषा वदन्ति ।
दैवं निहत्य कुरु पौरुषमात्मशक्त्या
यत्ने कृते यदि न सिध्यति कोऽत्र दोषः ॥ ७

---

१) प्रश्नाः—१. दैवस्य प्रबलतां पुरुषकारस्य कर्तव्यतां च सोदाहरणं समर्थयत ? २. वायसाः कस्य मूर्ध्नि तिष्ठेयुः ? ३. दोषः कदा न भवेत् ?

२) प्रयोगं विपरिणमयत—

१. मृगाः सुप्तस्य सिंहस्य मुखं न हि प्रविशन्ति ।
२) लक्ष्मीरुद्योगिनं पुरुषसिंहमुपैति ।
३) कापुरुषः दैवेन देयमिति वदन्ति ॥

३) अतिशायनार्थकैः पदैः वाक्यानि पूरयत—

१) दैवं पुरुषकारात् (बलवत्) ।
२) मतिः बलात् (गुरु) ।
३) दशरथस्य पत्नीनां कौसल्या (वृद्धा) ॥

४) कृत्प्रत्ययान्ताः—

आप् to obtain—(आप्नोति)=आप्तः, आप्तवान्, आप्नुवन्, आप्यमानः, आप्त्वा, (अवाप्य), आप्तुम्, आप्तव्यम्, आपनीयम्, आप्यम् ।

स्वप् to sleep—(स्वपिति) = सुप्तः, सुप्तवान्, स्वपन्, सुप्त्वा, (सुषुप्य) स्वपितुम्, स्वप्तव्यम्, स्वपनीयम्, स्वाप्यम् ॥

५) उपसर्गयोगादर्थभेदः—

लम्ब्—लम्बते। अवलम्बते, आलम्बते, विलम्बते ॥

६) सञ्चिन्त्य, सञ्चित्य—अनयोरर्थभेदं निर्दिशत ॥

७) पर्यायाः—

भाग्यम् ६—दैवं दिष्टं भागधेयं भाग्यम् स्त्री नियतिर्विधिः ।
मेरुः ५—मेरुः सुमेरुर्हेमाद्री रत्नसानुः सुरालयः ।
रसातलम् ४—अधोभुवन पाताल बलिसद्म रसातलम् ॥

पौरुष *n* manliness
पाषाण *m* stone
उद्योग *m* effort
पुरुषकार *m* manliness
मनोरथ *m* ambition
प्रासादसिंह *m* a palatial artificial lion
रसातल *n* nether world
अपार *a* endless
कापुरुष *m* a wicked man

## २२. त्रिशङ्कुमहाराजः

आसीत् पूर्वं सूर्यवंशे त्रिशङ्कुर्नाम महाराजः, यः स्वबाहुबलेन सर्वान् शत्रूनुन्मूल्य सागरपर्यन्तां पृथिवीं शशास। धर्मेण धरां परिपालयतः सर्वत्र विजयिनस्तस्य मनसि 'अनेन मर्त्यदेहेनैव स्वर्गारोहणं कार्यम्,' इति मनोरथः समजनि। ततः स तदर्थकं यज्ञं कर्तुमुद्युक्तः कुलगुरुं तपोनिधिं वसिष्ठमुपेत्य पौरोहित्याय वव्रे। वसिष्ठस्तु तस्य मनोरथमपथे प्रवृत्तं बुद्ध्वा तदर्थनां प्रत्याचष्ट ॥

तत्प्रत्याख्यानेन विद्धहृदयो राजा वसिष्ठस्य शतं पुत्रानुपेत्य सप्रश्रयमेकैकशस्तमेवार्थं ययाचे। तेऽपि तद्वचनं नाभ्य-

नन्दन्। तदा रोषाविष्टो राजा परुषवचनैस्तान् भृशमनिन्दत्। तदाकर्ण्य ते क्रुद्धास्तं 'चण्डालो भव' इत्यशपन्॥



ततश्चण्डालतां गतोऽपि त्रिशङ्कुः कथञ्चिदात्मनो मनोरथं साधयितुमिच्छन् वसिष्ठस्पर्धिनं महातपस्विनं विश्वामित्रं शरणमगच्छत्। विश्वामित्रस्तं वृत्तान्तमाकर्ण्य चण्डालस्यापि तस्य यज्ञं कर्तुं मतिं व्यधात्। अवदच्च—'राजन्! मा भैषीः। अहं त्वां याजयामि। स्वर्गं तव हस्तगतं जानीहि'—इति॥

ततः स यज्ञं निश्चित्य ब्राह्मणानामन्त्रयितुं सर्वतः शिष्यान् प्राहिणोत्। अकरोच्च यज्ञाय महान्तं सम्भारम्। कलशे च

दिवसे ब्राह्मणैः सह विश्वामित्रः सुदुष्करं सप्ततन्तु समारभत। देवास्तु स्वाहाकारैराहूयमाना अपि न समागताः ॥

तदनु विश्वामित्रः क्रुद्धो यज्ञं परित्यज्य चिरतप्तस्यात्मनस्तपसो बलेन त्रिशङ्कुं स्वर्गमारोपयामास। इन्द्रादयो दिवौकसः सदेहं चण्डालं स्वर्गमारोहन्तं वीक्ष्य झटित्यधः पातयामासुः। ततस्त्रिशङ्कुः 'त्रायस्व माम्, त्रायस्व माम्' इत्याक्रोशन्नपतत्। अधः पतंश्च सः 'त्रिशङ्को तिष्ठ! तिष्ठ!!' इत्युक्तवता कोपाक्रान्तेन कौशिकेन भूम्याकाशयोर्मध्ये स्थापितः ॥

कर्तव्यमेव कर्तव्यं कर्तव्यं लोकसम्मतम्।
अकर्तव्यं तु कुर्वाणस्त्रिशङ्कुः स्मर्यतां जनैः ॥

---

१) प्रश्नाः—१. त्रिशङ्कुः कीदृशो राजा? २. तस्य मनसि कीदृशो मनोरथः समजनि? ३. ततः स किमकरोत्? ४. कः कुतस्तस्य प्रार्थनां प्रत्याचष्ट? ५. के कुतस्तं चण्डालो भव इत्यशपन्? ६. ततः राजा किमकरोत्? ७. स किमुक्त्वा किमकरोत्? ८. के यज्ञं प्रति न समागताः? ९. तदनु विश्वामित्रः किं चकार? १०. ततः किं वृत्तम्? ११. त्रिशङ्कोः कथया किं युष्माभिर्गृह्यते?

२) अधः निर्दिष्टानां धातूनां णिजन्तरूपैः वाक्यानि पूरयत—
१. विश्वामित्रस्त्रिशङ्कुमहाराजं (यजति—लङ्)।
२. स महर्षिरात्मनस्तपोबलेन तं स्वर्गं (आरोहति—लङ्)।
३. महात्मान आरब्धं कार्यम् अन्तं (गच्छति—लङ्)।
४. चण्डालं स्वर्गमारोहन्तं देवा झटित्यधः (पतति—लङ्)।
५. विश्वामित्रस्तं भूम्याकाशयोर्मध्ये (तिष्ठति—लङ्) ॥

३) कृत्प्रत्ययान्ताः—

व्यध् (to pierce)—विध्यति = विद्धः, विद्धवान्, विध्यन्, विध्यमानः, विध्वा, (प्रविध्य) वेद्धुम्, वेद्धव्यम्, वेधनीयम्, वेध्यम् ॥

क्रुध् (to be angry)—क्रुध्यति = क्रुद्धः, क्रुद्धवान्, क्रुध्यन्, क्रुध्वा, (संक्रुध्य), क्रोद्धुम्, क्रोद्धव्यम्, क्रोधनीयम्, क्रोध्यम् ॥

४) उपसर्गयोगादर्थभेदः—

चक्ष्—चष्टे। आचष्टे, प्रत्याचष्टे, व्याचष्टे।

स्मृ—स्मरति। विस्मरति, संस्मरति ॥

५) पर्यायाः—

आकाशः १६—द्योदिवौ द्वे स्त्रियामभ्रं व्योम पुष्करमम्बरम्।
नभोऽन्तरिक्षं गगनम् अनन्तं सुरवर्त्म खम्।
वियद्विष्णुपदं वा तु पुंस्याकाशविहायसी।

यजमानः २—यष्टा च यजमानश्च ॥

पुरोहितः ३—पुरोधास्तु पुरोहितः ॥

यज्ञः ७—यज्ञः सवोऽध्वरो यागः सप्ततन्तुर्मखः क्रतुः।

---

उन्मूल्य *in.* having uprooted

धरा *f* the earth

सप्रश्रयम् *in.* respectfully

प्राहिणोत् *P.* sent

सम्भार *m* preparation

क्लृप्त *a* appointed, pro-

सप्ततन्तु *m* sacrifice [per

स्वाहाकार utterance of the exclamation स्वाहा

दिवौकस् *m* inhabitant of heaven



## २३. सहपाठिनां संभाषणम्

कस्मिंश्चिदग्रहारे रामो भीमः श्यामश्चेति त्रयः सहपाठिनोऽवर्तन्त। तेषां रामः सुबुद्धिः, भीमो मन्दबुद्धिः, श्यामो दुष्टबुद्धिश्चासीत्। रामः स्वीयं दैनन्दिनं पाठं काले पठन्नुद्यमशाली बभूव। भीमः पठितुकामोऽप्यप्रगल्भ आसीत्। श्यामस्तु न जातु पठति; किन्तु सहाध्यायिन उपाध्यायं च निन्दन् कालं नयति। एकदा श्यामो भीमस्य गृहमगच्छत्। तत्र तयोरयं सँल्लापः प्रवृत्तः—

श्यामः—सखे भीम! अस्माकमुपाध्यायः दुष्टः। सः रामे नितरां स्निह्यति। आवां च तीव्रं दण्डयति। तत्रापि मां पदे पदे ताडयति। अतीव शोचनीयमिदम्॥

भीमः—सखे ! न युक्तमुक्तं त्वया। रामः सम्यक् पाठान् पठति। उपाध्यायस्य प्रश्नानां युक्ततराण्युत्तराणि च वदति। सुलभ उपाध्यायानामुद्यमशीलेषु छात्रेषु पक्षपातः ॥

श्यामः—किमावां न छात्रौ ?

भीमः—सखे ! आवामपि छात्रावेव। किन्तु न पाठान् पठावः। नाप्युपाध्यायस्य प्रश्नानामुत्तराणि दद्वः ॥

श्यामः—उपाध्याय आवां न सम्यक् पाठयति ॥

भीमः—सखे ! तदप्यसङ्गतम्। एकदैवोपाध्यायो राममावां च पाठयति, न तु रामं पृथक्तया। तस्मात् त्वदुक्तमयुक्तमेव। मन्ये, पठने समादरणीयः साधीयान् कोऽप्युपायः स्यात्, येन रामः सम्यक् पठति ॥

श्यामः—भद्र ! मन्ये, स कामपि यक्षिणीमाराधयति, यस्याः प्रसादेन स सम्यगधीते ॥

भीमः—गच्छावस्तस्यैवान्तिकम्। तमेव पृच्छावः ॥

(अथ भीमः श्यामश्च, रामस्य गृहं गच्छतः)

भीमः—सखे राम ! त्वया प्रत्यहं पाठाः सम्यक् पठ्यन्ते। उपाध्यायस्य प्रश्नानां सम्यगुत्तराणि च दीयन्ते। तत् कथम् ? अप्यस्ति कश्चिदुपायः पठने समादरणीयः ?

रामः—सौम्य ! नात्र विशेषतः कश्चिदुपायोऽस्ति। अहं तावत् सर्वदोपाध्यायस्य वचनं श्रद्धया शृणोमि। श्रुतं च गृहं गत्वा रात्रौ चिन्तयामि। चिन्तितं च प्रातरुत्थायाव-

धारयामि। यदि तत्र सन्देह उत्पद्यते तर्हि सहाध्यायिनः उपाध्यायं वा पृष्ट्वा तं विषयमवगच्छामि। तेनाहमुपाध्यायस्य प्रश्नानामुत्तराणि दातुं शक्नोमि। यद्येवं कुर्युस्तर्हि सर्वेऽपि च्छात्राः शक्ता भवेयुः। उद्यम एव विद्यार्थिनां परमो बन्धुः॥

भीमस्तन्निशम्य तदाप्रभृति तथैवाकरोत्। कतिपयैरेव दिवसैः सोऽपि राम इव बुद्धिमान् बालको बभूव। श्यामस्तु न केवलं दुष्टबुद्धिः, किन्त्वलसश्चासीत्। नासौ कदाऽप्युपाध्यायस्य वचनानि श्रद्धत्ते, न च गृहे जातु पुस्तकमप्युद्घाटयति। स च परेषां प्रतारणेऽत्यन्तं निपुणः॥

एकस्मिन् दिवसे ते त्रयोऽपि वयस्याः क्वापि रथ्यायाः परिसरे क्रीडन्तो बभूवुः। तदा श्यामो राममतिसन्धातुमिच्छन् ब्रवीति—

श्यामः—सखे राम! त्वं कर्मशूर इत्युपाध्यायो वदति। अस्तु तावत्। अपि त्वं मया चक्षुषी निमील्य क्रियमाणं किमपि कर्म चक्षुषी उन्मील्य करिष्यसि? किं ब्रवीषि?

रामः—(सामोदम्) सखे! कः सन्देहः? करिष्यामि॥

श्यामः—सत्यम्?

रामः—सत्यमेव॥

श्यामः—सखे भीम! त्वं साक्षी॥

भीमः—आम्, अहमस्मि साक्षी॥

ततः श्यामो रथ्याया रजः पुञ्जमादाय स्वचक्षुषी निमील्य तदुपरि प्राक्षिपत् । अब्रवीच्च रामम्—'सखे! यन्मया चक्षुषी निमील्य कृतं तत् त्वया चक्षुषी उन्मील्य क्रियताम्'-इति । रामस्तद्दृष्ट्वा गृहं प्रति पलायत ॥

॥ त्यज दुर्जनसंसर्गं भज साधुसमागमम् ॥

---

१) प्रश्नाः—१. रामो भीमः श्यामश्च कीदृशा बभूवुः? २. कुत उपाध्यायो रामेऽस्निह्यत्? ३. कोऽसावुपायो रामेण पठने समादृतः? ४. भीमः कथम् उत्तरदाने शक्तः अभवत्? ५. श्यामो रामं वञ्चयितुमिच्छन् किमकरोत्? ६. अनेन किं पठ्यते युष्माभिः?

२) प्रयोगं विपरिणमयत—

१. स यक्षिण्याः प्रसादेन सम्यगधीते ।

२. न स उपाध्यायस्य वचनानि श्रद्धत्ते ॥

३) निर्दिष्टैर्लकारैः वाक्यानि पूरयत—

१. उद्यमिनश्छात्रा उपाध्यायस्य प्रश्नानामुत्तराणि दा..लट् ।

२. न वयमुन्मत्तानां वचनानि श्रत्+धा .. लट् ।

३. भृत्यः सायं विद्यालयस्य द्वाराणि पिधा ... लट् ॥

४) उपसर्गयोगादर्थभेदः—

दा—ददाति, दत्ते । आदत्ते, उपादत्ते एवं आददाति इत्यादि । धा—दधाति, धत्ते । अतिसन्धत्ते, अपिधत्ते (पिधत्ते) अभिधत्ते, अवधत्ते, विधत्ते, निधत्ते, परिधत्ते, सन्धत्ते । एवम् 'अपिदधाति' इत्यादि ।

५) कृत्प्रत्ययान्ताः—

दा to give—(ददाति, दत्ते) = दत्तः, दत्तवान्, ददत्, ददानः दीयमानः, दत्त्वा, (आदाय), दातुम्, दातव्यम्, दानीयम्, देयम्।

धा (to bear)—दधाति, धत्ते = हितः, हितवान्, दधत्, धीयमानः, हित्वा, (निधाय) धातुम्, धातव्यम्, धानीयम्, धेयम्॥

६) अतिशायनार्थकानि विशेषरूपाणि—

| | | |
|---|---|---|
| बाढः | साधीयान् | साधिष्ठः |
| प्रशस्यः | श्रेयान् | श्रेष्ठः |
| उरुः | वरीयान् | वरिष्ठः |
| मृदुः | म्रदीयान् | म्रदिष्ठः |

७) पर्यायाः—

प्रभातम् ६-प्रत्यूषोऽहर्मुखं कल्यमुषः प्रत्युषसी अपि प्रभातं च।
दिनान्तः ४-दिनान्ते सायं सन्ध्या दिनक्षयः।
सखा ६-स्निग्धो वयस्यः सवया अथ मित्रं सखा सुहृत्॥

---

पृथक्ता *f* separateness
यक्षिणी *f* female यक्ष or [fairy
न जातु *in.* never
प्रतारण *n* deceit
वयस्य *m* friend
परिसर *m* vicinity
अतिसन्धातुम् *in.* to deceive
निमील्य *in* having shut
उन्मील्य *in.* having opened
रजःपुञ्ज *m* heap of dust.



## २४. गृध्रो मार्जारश्च

अज्ञातकुलशीलस्य वासो देयो न कस्यचित् ।
मार्जारस्य हि दोषेण हतो गृध्रो जरद्गवः ॥

तद्यथा—अस्ति भागीरथीतीरे गृध्रकूटनाम्नि पर्वते महान् पर्कटीवृक्षः । तस्य कोटरे जराजीर्णो गलितनखनयनो जरद्गवनामा गृध्रः प्रतिवसति । अथ कृपया तज्जीवनाय तद्वृक्ष-वासिनः पक्षिणः स्वाहारात् किञ्चित्किञ्चिदुद्धृत्य तस्मै ददति । तेनासौ जीवति । शावकानां च रक्षणं करोति ॥

अथ कदाचिद्दीर्घकर्णनामा मार्जारः पक्षिशावकान् भक्षयितुं तत्रागतः। तमायान्तं दृष्ट्वा पक्षिशावकैर्भयार्तैः कोलाहलः कृतः। तच्छ्रुत्वा जरद्गवेनोक्तम्—कोऽयमायाति? दीर्घकर्णो गृध्रमवलोक्य स्वयं सभयमाह—'हा हतोऽस्मि! अधुनाऽस्य सन्निधाने पलायितुमक्षमः। तद्यथा भवितव्यं तथा भवतु। तावद्विश्वासमुत्पाद्यास्य समीपमुपगच्छामि' – ॥

एवमालोच्योपसृत्याब्रवीत्—आर्य! त्वामभिवन्दे। गृध्रोऽवदत्—कस्त्वम्? सोऽवदत्—मार्जारोऽहम्। गृध्रो ब्रूते—दूरमपसर, नो चेद्धतो भवेस्त्वम्। मार्जारोऽवदत्—श्रूयतां तावदस्मद्वचनम्। ततो यद्यहं वध्यस्तदा हन्तव्यः। गृध्रो ब्रूते—ब्रूहि, किमर्थमागतोऽसि? सोऽवदत्—अहमत्र गङ्गातीरे नित्यस्नायी ब्रह्मचारी चान्द्रायणव्रतमाचरंस्तिष्ठामि। यूयं धर्मज्ञानरता इति विश्वासभूमयः पक्षिणः सर्वे सर्वदा ममाग्रे प्रस्तुवन्ति। अतो भवद्भ्यो विद्यावयोवृद्धेभ्यो धर्मं श्रोतुमिहागतः। भवन्तश्चैतादृशा धर्मज्ञाः यन्मामतिथिं हन्तुमुद्यताः। मयाऽपि धर्मशास्त्राण्यधीतानि। गृहस्थधर्मश्चैषः— यदि वा धनं नास्ति तदा प्रीतिवचसाऽप्यतिथिः पूज्य एव ॥

गृध्रोऽवदत्—मार्जारो हि मांसरुचिः! पक्षिशावकाश्चात्र निवसन्ति। तेनाहमेवं ब्रवीमि। तच्छ्रुत्वा मार्जारो भूमिं स्पृष्ट्वा कर्णौ स्पृशति। ब्रूते च—मया धर्मशास्त्राणि श्रुत्वा वीतरागेणेदं दुष्करं व्रतं चान्द्रायणमध्यवसितम्। परस्परं

विवदमानानामपि धर्मशास्त्राणाम् 'अहिंसा परमो धर्मः' इत्यत्रै-कमत्यम्। एवं विश्वासमुत्पाद्य मार्जारस्तत्कोटरे न्यवसत्॥

ततो दिनेषु गच्छत्सु पक्षिशावकानाक्रम्य कोटरमानीय प्रत्यहं खादति। येषामपत्यानि खादितानि तैः शोकार्तैः विलपद्भिरितस्ततो जिज्ञासा समारब्धा। तत् परिज्ञाय मार्जारः कोटरान्निस्सृत्य बहिः पलायितः। पश्चात् पक्षिभिरितस्ततो निरूपयद्भिस्तत्र तरुकोटरे शावकास्थीनि प्राप्तानि। अनन्तर-मनेनैव जरद्गवेनास्माकं शावकाः खादिता इति सर्वैः पक्षिभि-र्निश्चित्य गृध्रो व्यापादितः॥

---

१) प्रश्नाः—१. जरद्गवः कुत्र प्रतिवसति? २. केन स जीवति? ३. दीर्घकर्णः किमर्थं तत्रागतः? ४. स जरद्गवमवलोक्य स्वयं किमाह? ५. कथं तेन विश्वासं उत्पादितः? ६. 'दिनेषु गच्छत्सु किमभूत्? ७. परिणामश्च कीदृश आसीत्?

२) प्रयोगं विपरिणमयत—

१. दीर्घकर्णं दृष्ट्वा पक्षिशावकैः कोलाहलः कृतः।
२. यूयं धर्मज्ञानरता इति पक्षिणो ममाग्रे प्रस्तुवन्ति।
३. मयाऽपि धर्मशास्त्राण्यधीतानि।
४. सर्वैः पक्षिभिर्मिलित्वा गृध्रो व्यापादितः॥

३) अतिशायनार्थकैः पदैः वाक्यानि पूरयत—

१. अल्पविद्यादविद्यः ... (प्रशस्य)।
२. निःश्रेयसाय कर्ममार्गात् ज्ञानमार्गः ... (बाढ)।
३. मूर्खपुत्रात् मृतः पुत्रः ... (उरु)।
४. सर्वेषु कुसुमेषु शिरीषकुसुमं ... (मृदु)॥

४) कृत्प्रत्ययान्ताः—

पद् to move—(पद्यते, णिजन्तं पादयति)=पादितः, पादितवान्, पादयन्, पाद्यमानः, पादयित्वा, (सम्पाद्य) पादयितुम्, पादयितव्यम्, पादनीयम्, पाद्यम्।

चि to collect—(चिनोति)=चितः, चितवान्, चिन्वन्, चीयमानः, चित्वा, (विचित्य) चेतुम्, चेतव्यम्, चयनीयम्, चेयम्॥

५) उपसर्गयोगादर्थभेदः—

पद्—पद्यते। णिजन्तं पादयति। आपादयति। उत्पादयति, उपपादयति, निष्पादयति, प्रतिपादयति, सम्पादयति॥

६) उपसर्गयोगादात्मनेपदम्—विवदते॥

७) भवन्तश्चैतादृशा धर्मज्ञाः—पूजायां बहुवचनम्॥

८) पर्यायाः—

मार्जारः ५—ओतुर्विडालो मार्जारः पृषदंशक आखुभुक्।
पर्कटी ३—प्लक्षो जटी पर्कटी स्यात्।
वटः ३—न्यग्रोधो बहुपाद्वटः।
अतिथिः ४—स्युरावेशिक आगन्तुः अतिथिर्ना गृहागते॥

---

पर्कटीवृक्ष *m* the wave-leaved fig-tree
कोटर *m. n.* the hollow of a tree
चान्द्रायणव्रत *n* a religious observance regulated by the waxing and waning of the moon
वीतराग *a* free from desire or passion
अध्यवसितम् *a* resolved
विवदमान *a* disputing
ऐकमत्यम् *n* unanimity, sameness of opinion
अपत्य *n* young one
व्यापादित *a* killed.

## २५. हिमालयः

अस्त्युत्तरस्यां दिशि देवतात्मा
हिमालयो नाम नगाधिराजः ।
पूर्वापरौ तोयनिधी वगाह्य
स्थितः पृथिव्या इव मानदण्डः ॥

(श्री काळिदासविरचिते कुमारसंभवे 1st sloka)

अस्ति भारतखण्डस्योत्तरस्यां दिशि हिमालयो नाम महीधरः; यः पूर्वापरौ तोयनिधी वगाह्य स्थितो भारतवर्षस्योदीचीं सीमानमापादयति । यस्य च दैर्घ्यम् अष्टशतं क्रोशाः । विस्तारस्तु अवरतः पञ्चसप्ततिः क्रोशाः, परमतः पञ्चाशदुत्तरशतम् क्रोशाश्च भवन्ति । दैर्घ्येण वैशाल्येन औन्नत्येन च हिमालयोऽयं सर्वान् पर्वतानतिशेते । न केवलं भारतखण्डे, किन्तु समग्रेऽपि भूमण्डले नास्त्येतादृशोऽन्यः पर्वतः । अतोऽयं 'नगाधिराजः' इति स्थाने व्यपदिश्यते ॥

हिमालयोऽयं क्रमश उन्नतोन्नताभिस्तिसृभिः श्रेणीभिः चकास्ति । तत्र प्रथमा श्रेणिः त्रिसहस्रपदोन्नता महाद्रुमैराकीर्णा अरण्यानी भवति । अथाप्यस्या ऊर्ध्वसानुषु जनाः प्रतिवसन्ति । विविधानि धान्यानि चात्र प्ररोहन्ति । द्वितीया श्रेणिः अष्टादशसहस्रपदोन्नता वेणुतुल्यैः दीर्घैस्तृणैः हिंस्रैर्मृगैश्चाभिव्याप्ता । नात्र जना निवसन्ति ॥

तृतीया श्रेणिः परश्शतैरभ्रङ्कषैः शृङ्गैः संशोभते । तेषु पञ्चचत्वारिंशच्छृङ्गाण्यत्यन्तमुन्नतानि । तेषां तुङ्गतमं गौरीशङ्कराख्यं शृङ्गं द्व्युत्तरनवविंशतिसहस्रं पदान्युच्छ्रयते । नास्यां श्रेण्यां वृक्षः प्ररोहन्ति । नापि जन्तवो जीवन्ति । किन्त्वेषा श्रेणी सर्वकालं शिलाकठिनया हिमान्या प्रावृता वर्तते । या खलु हिमानी निदाघकाले विलीयमाना वृष्टिमन्तरेणापि स्रोतस्विनीषु स्रोतांस्यभिवर्धयति । अत एवास्य पर्वतस्य हिमालयव्यपदेशः ॥

भारतीयाः विदेशीयाश्च महता प्रयत्नेन गौरीशङ्करशृङ्गम् आरोढुं चिराय प्रायतन्त । तत्र भारतीयाः सुधीराः धीमन्तः विजयिनः अभूवन् । तेभ्यः राष्ट्रपतिना 'पद्मश्री,' 'पद्मभूषण' इत्यादीनि बिरुदानि दत्तानि । अहो! भारतीयानां धन्यता ॥

हिमालयोऽयं पूर्वपश्चिमप्रान्तयोः क्रमेण अवनतः वर्तते । विद्यन्ते च तत्र तिब्बतदेशप्रापका दुर्गमाः पन्थानः । यद्ययं सर्वत्राप्यैकरूप्येण तुङ्गोऽभविष्यत् तर्हि तद्बाह्या जनास्तया दिशा भारतवर्षं प्रवेष्टुं नाशक्ष्यन् ॥

हिमाचलादस्माद्गङ्गाप्रभृतयो नद्यः सिन्धुप्रभृतयो नदाश्चोद्भूय भारतभूमौ प्रवहन्ति । यो हि वायुना नीयमानान् मेघान् जलकणांश्च निरुन्धन् नानाविधानां नदीनां प्रभवतामृच्छति । भारतवर्षस्य सम्पत्समृद्धौ हिमालय एव मुख्यो हेतुः । अत एवैनं देवतात्मानमाकलयन्ति भारतीयाः ॥

---

१) प्रश्नाः-१. हिमालयस्य शैलराज इति व्यपदेशः कथं सङ्गच्छते?

२. हिमालयस्य तिस्रः श्रेणीरधिकृत्य किं जानीध्वे ?

३. हिमालयः पूर्वपश्चिमप्रान्तयोः कीदृशो वर्तते ?

४. भारतवर्षस्य सम्पत्समृद्धौ हिमालयः कथं मुख्यो हेतुः ?

५. भारतीयैः कथम् अयं देवतात्मा आकलितः ?

२) 'लृङ्' प्रयोगस्योदाहरणानि (Underlined)—

१. यदि हिमालयः सर्वत्रैकरूप्येण तुङ्गोऽभविष्यत् तर्हि तद्बाह्या जनास्तया दिशा भारतवर्षं न आगमिष्यत् ॥

२. यदि काले सुवृष्टिरभविष्यत् तर्हि सुभिक्षमभविष्यत् ॥

३) One word for :—

महत् अरण्यम् = अरण्यानी । महत् हिमम् = हिमानी ।

४) दिशः चतस्रः (Four Directions)—

| | | | | | | |
|---|---|---|---|---|---|---|
| १. पूर्वा | or | प्राची | or | ऐन्द्री | East. |
| २. दक्षिणा | or | अवाची | or | याम्या | South. |
| ३. पश्चिमा | or | प्रतीची | or | वारुणी | West. |
| ४. उत्तरा | or | उदीची | or | कौबेरी | North. |

५) विदिशः चतस्रः (Four Intermediate Directions)—

| | | | |
|---|---|---|---|
| १. दक्षिणपूर्वा | or | आग्नेयी | South-East. |
| २. दक्षिणपश्चिमा | or | नैर्ऋती | North-West. |
| ३. उत्तरपश्चिमा | or | वायवी | South-West. |
| ४. उत्तरपूर्वा | or | ऐशानी | North-East. |

६) कृत्प्रत्ययान्ताः—

गाह् to dive into-(गाहते) = गाढः, गाढवान्, गाहमानः, गाह्यमानः, गाढ्वा, (वगाह्य) गाढुम्, गाढव्यम्, गाहनीयम्, गाह्यम् ।

वृ to cover—(वृणोति, वृणुते) = वृतः, वृतवान्, वृण्वन्, वृण्वानः, व्रियमाणः, वृत्वा, (संवृत्य) वरितुम्, वरितव्यम्, वरणीयम् ॥

७) उपसर्गयोगादर्थभेदः—

रुध्—(रुणद्धि, रुन्धे)=अनुरुणद्धि, अवरुणद्धि, उपरुणद्धि, निरुणद्धि, विरुणद्धि। एवमात्मनेपदेऽपि।

कल्—कलयति, आकलयति, विकलयति, सङ्कलयति ॥

८) पर्यायाः—

हिमम् ७—अवश्यायस्तु नीहारः तुषारस्तुहिनं हिमम्। प्रालेयं मिहिका...॥

संपत् ४—..संपत् संपत्तिः श्रीश्च लक्ष्मीश्च...

---

महीधर *m* mountain
तोयनिधि *m* ocean
उदीची *f* northern
सीमन् *f* boundary
अवरतः *in.* at least
परमतः *in* at the most
वैशाल्य *n* extensiveness
समग्र *n* entire
स्थाने *in.* rightly
श्रेणी *f* range
अरण्यानी *f* large forest
सानु *m. n.* summit
वेणुतुल्य bamboo like
परः शत *a* more than a hundred
अभ्रङ्कष *a* touching the sky
शृङ्ग *n* peak
तुङ्गतम *a* the highest
गौरीशङ्कर *n* the Mount Everest
सर्वकालम् *in* always
हिमानी *f* collection of snow
स्रोतस्विनी *f* river, stream
अवनतः *a* stopping
प्रभवता *f* the state of being the source

## २६. साधवः

उपकारिषु यः साधुः साधुत्वे तस्य को गुणः ।
अपकारिषु यः साधुः स साधुः सद्भिरुच्यते ॥ १

यथा चित्तं तथा वाचो यथा वाचस्तथा क्रियाः ।
चित्ते वाचि क्रियायां च साधूनामेकरूपता ॥ २

नालिकेरसमाकारा दृश्यन्ते भुवि सज्जनाः ।
अन्ये बदरिकाकारा बहिरेव मनोहराः ॥ ३

श्लोकः सुश्लोकतां याति यत्र तिष्ठन्ति साधवः ।
लकारो लुप्यते तत्र यत्र तिष्ठन्त्यसाधवः ॥ ४

उपेक्षन्ते न च स्नेहं न पात्रं न दशान्तरम् ।
सदा लोकहिते युक्ता रत्नदीपा इवोत्तमाः ॥ ५

परपरिवादे मूकः परनारीदर्शनेऽपि जात्यन्धः ।
पङ्गुः परधनहरणे स जयति लोके महापुरुषः ॥ ६

प्रियप्राया वृत्तिर्विनयमधुरो वाचि नियमः
प्रकृत्या कल्याणी मतिरनवगीतः परिचयः ।
पुरो वा पश्चाद्वा तदिदमविपर्यासितरसं
चरित्रं साधूनामनुपधि विशुद्धं विजयते ॥ ७

---

१) प्रश्नाः—१. कः साधुः सद्भिरुच्यते? २. साधूनामेकरूपता कथम्? ३. बहिरेव मनोहराः के? ४. 'लकारो लुप्यते तत्र' कस्य लकारः कुत्र लुप्यते? ५. 'रत्नदीपा इवोत्तमाः' कथम्? ६. 'स जयतिलोके महापुरुषः कः? ७. साधूनां चरित्रं कीदृशम्?

२) प्रयोगं विपरिणमयत—

१. अपकारिषु यः साधुः स साधुः सद्भिरुच्यते।
२. स जयति लोके महापुरुषः।
३. साधूनां यशः सर्वत्र सर्वैः गीयते॥

३) तुमुन्नन्तैः पदैः वाक्यानि पूरयत—

१. आस्तिकः धर्मं श्रु ... आचार्यमुपगच्छति।
२. साधवः प्राणव्ययेनापि परेषान् उप+कृ .... यतन्ते।

४) 'लृङ्' रूपैः वाक्यानि पूरयत—

१. यति जम्बुकः काकं न स्तु ... तर्हि मांसखण्डं न लभ् ....
२. यदि श्यामः सम्यक् पठ्....तर्हि उपाध्यायस्तं न ताड्....
३. यदि सूर्यो न वृत्...तर्हि जगदिदमन्धकारमयं भू... ॥

५) दा, धा, मा, स्था, गा, पा, हा—एषां कर्मणि लटि रूपाणि निर्दिशत॥

लुप् (to take away)—(लुम्पति,) to be destroyed (लुप्यति)=लुप्तः, लुप्तवान्, लुम्पन्, लुप्यमानः, लुप्त्वा, (विलुप्य) लोप्तुम्, लोप्तव्यम्, लोपनीयम्, लोप्यम्।
तप् to do penance—(तपति)=तप्तः, तप्तवान्, तपन्, तप्यमानः, तप्त्वा, (सन्तप्य) तप्तुम्, तप्तव्यम्, तपनीयम्, तप्यम्॥

७) उपसर्गयोगादर्थभेदः—जि—जयति । पराजयते, विजयते ॥

८) नानार्थाः—साधुर्वार्धुषिके रम्ये सज्जने चाभिधेयवत् ॥

९) पर्यायाः—

सज्जनः ६—महाकुल कुलीनार्य सभ्य सज्जन साधवः ।
सदृशः ६—समानस्तु समस्तुल्यः सदृक्षः सदृशः सदृक् ॥

साधु *a* well disposed
बदरिका *f* the fruit of the बदरी jujube tree
स्नेह *m* oil and affection or love
पात्र *n* reservoir, also a worthy person
दशान्तर *n* different state; a lamp
परपरिवाद *m* blame, stain
मूक *m* dumb person
जात्यन्ध *a* born blind
पङ्गु *a* lame
कल्याणी *f* agreeable, lovely
अनवगीत *a* faultless
अविपर्यासितरस *a* with sentiment unchanged
अनुपधि *a* devoid of fraud

## २७. श्री बुद्धदेवः

आसीत् पूर्वं प्रायेण पञ्चशताधिकद्विसहस्रवत्सरेभ्यः प्रागुत्तरभारतवर्षे रोहिणीनद्यास्तीरे कपिलवस्तुनाम्नि नगरे शुद्धोदनो नाम शाक्यवंशसमुद्भवः नरपतिः । मायादेवी नाम राज्ञी तस्य जाया बभूव । तयोरात्मज एव गौतमबुद्धो नाम । गौतमबुद्धोऽयं 'सिद्धार्थ' इति 'शाक्यसिंह' इति चाभिधीयते ।

राजन्ननुरसौ गुणवान् रूपवान् बलवान् धीरः शूरश्चासीत्। तस्य जननात् परं सप्तमे दिवसे मायादेवी दिवं जगाम। ततः प्रभृति शुद्धोदन एव तत्संवर्धनपरो बभूव। भविष्यच्चक्रवर्तिनमात्मनः कुमारं महताऽऽदरेण पोषयामास शुद्धोदनः ॥



अथ प्राप्तवयस्कः कुमारः पित्रा नियुक्तो नानादेशीयां वर्णमाला भाषाश्च पर्यशीलयत्। राजोचिताः सर्वा विद्याः कलाश्च जग्राह। धनुर्वेदे नितरां कुशलोऽभवत्। सर्वस्वामिगुणोपेतः स्वकुमारः समस्तसामन्ताभिवन्दितचरणश्चक्रवर्ती भविष्यतीति मन्यमानः शुद्धोदनश्चेतसि परमानन्दमभजत् ॥

अष्टादशे वर्षे तस्य निरतिशयलावण्यया यशोधराख्यया राजसुतया सह विवाहो निर्वर्तितः पित्रा। तयोरेकः सुतः समजनि रहुलो नाम। विवाहानन्तरमसौ गौतमो विभवैर्विराजमाने राजभवने दश वर्षाणि बन्धुभिः सार्धं वसति स्म। नासौ तेन निर्वृतिं प्रपेदे॥

गौतमः प्रकृत्या विरक्तचित्तः कारुण्यनिधिः परदुःखदुःखितश्चासीत्। जनानां जरामरणे विलोक्य तस्य चेतो व्याकुलतामगात्। जनैरनुभूयमानाः क्लेशास्तस्य हृदयं तुदन्ति स्म। कथमेते जनाः क्लेशान्मुक्ता भवेयुरिति चिन्तापरो जातः। ततः स तदुपायमन्विष्यन्नेकस्यां रात्रौ निद्राणेषु गृहजनेषु पितरं पुत्रं कलत्रं च वञ्चयित्वा तपोवनाभिमुखः प्रतस्थे॥

तपोवनमासाद्यासौ शिरो मुण्डयित्वा काषायाम्बरं धृत्वा चिरं तपस्विभिः सार्धमवसत्। नासौ तत्र जनानां क्लेशान्मुक्तेरुपायमलभत। अनन्तरं गयां प्राप्य तत्रासौ षड्वर्षाणि शिष्यैः सार्धमत्यवाहयत्। स च देशः पश्चात् बुद्धगयेत्याख्यां जगाम। बुद्धगया सम्प्रति मनोहरैर्विहारैरलङ्कृतं बौद्धानां महत् पुण्यक्षेत्रम्॥

अनन्तरं गौतमः कस्यचित् पिप्पलतरोर्मूलमासाद्य तत्र योगपीठमधिरूढैस्तीव्रं तपोऽतप्यत। तत्रासौ बोधिमलभत। बोधिर्नाम निश्चिता बुद्धिः। सोऽयं पिप्पलवृक्षः पश्चात् बोधिवृक्ष इति प्रथामवाप॥

अस्य चैव वृक्षस्य कश्चित् शाखातरुः अशोकमहाराज पुत्रेण 'महिन्द' नाम्ना सिंहळद्वीपे प्राचीनतमराजधान्यां अनुराधपुरे महाविहारे सिंहलद्वीपे मतप्रचारकान् संप्रेष्य प्ररोपितः, चरित्रप्रसिद्धः भूमण्डले एव प्राचीनतमः समाख्यायते जनैः। यः ततः प्रभृति अद्य यावत् तत्रत्यैः सादरं जलसेकादिना परिपोषितो दृश्यते ॥

चिरमेवं तपश्चरन् गौतमबुद्धस्तत्वप्रकाशमधिगत्य लोके नूतनं मतं प्रचारयामास। क्लेशानां प्रहाणाय जनैरनुसरणीयां सरणिं दर्शयामास। कारुण्यविवशोऽसौ 'न हिंस्यात् सर्वाणि भूतानि' इत्युपदिदेश। पशुमारणमप्यसौ नासहत। 'अहिंसा परमो धर्मः, सोऽधर्मः प्राणिनां वधः'। इत्थं बुद्धमतस्य परमः सिद्धान्तः ॥

गौतमबुद्धोऽयं वैशाखे मासि पौर्णम्यां तिथौ विशाखानक्षत्रे कपिलवस्तुनगरोद्याने लब्धजन्मा स्वीयेऽशीतितमे वर्षे तस्मिन् एव मासि तस्यामेव तिथौ तस्मिन्नेव नक्षत्रे वाराणस्यां मल्लिकोद्याने निर्वाणं प्राप्तः। असौ विष्णोरवतारत्वेन पुराणेष्वाख्यातः ॥

यद्यपि बौद्धग्रन्थाः प्रायेण संस्कृतभाषया लिखितास्तथापि बुद्धदेवः स्वीयं मतं सर्वजनसाधारण्या पालीभाषया प्रचारयामास। अतः पण्डिता इव पामराश्चापि तन्मतमनुसरन्ति स्म। लोके जनानां चतुर्ष्वेको भागस्तन्मतानुयायी

दृश्यते। बुद्धमतावलम्बिनः सम्प्रति भारतवर्षे सिंहलद्वीपे ब्रह्मप्रभृतिषु देशेषु च प्रतिवसन्ति। बुद्धमतमिदं जनैरुत्कृष्टानां मतानामन्यतमत्वेन परिगण्यते ॥

---

१) प्रश्नाः—१. बुद्धदेवः कस्मिन् वंशे जातः? कयोः पुत्रः?
२ प्राप्तवयस्कः कुमारः किं किं परिशीलितवान्? ३. गौतमबुद्धः प्रकृत्या कीदृश आसीत्? ४. स कुत्र कुत्र तपश्चकार?
५. कुत्रासौ बोधिमलभत? ६. बोधिवृक्षमधिकृत्य किं जानीध्वे?
७ तत्वप्रकाशमधिगत्य स किमकरोत्?
८. तन्मतस्य परमः सिद्धान्तः कः?
९ कुत्र कदा स जातः? कुत्र कदा च निर्वाणं प्राप्तः?
१०. तन्मतानुयायिनः सम्प्रति कुत्र भूयस्तया प्रतिवसन्ति?

२) आख्यातानां स्थाने क्तवत्वन्तानि रूपाणि निवेशयत—
१) शुद्धोदनः कुमारं महताऽऽदरेण पोषयामास।
२) स दशवर्षाणि बन्धुभिः सार्धं वसति स्म।
३) स नूतनं मतं लोके प्रचारयामास।
४) स जनैरनुसरणीयां सरणिं दर्शयामास॥

३) साधम्, मित्रम्, कलत्रम्—एतैः पृथक् वाक्यानि रचयत॥

४) पर्यायाः—

बुद्धः २२—सर्वज्ञः सुगतो बुद्धो धर्मराजस्तथागतः।
समन्तभद्रो भगवान् मारजिल्लोकजिज्जिनः॥
षडभिज्ञो दशबलोऽद्वयवादी विनायकः।
मुनीन्द्रः श्रीघनः शास्ता मुनिः शाक्यमुनिस्तु यः
स शाक्यसिंहः सर्वार्थसिद्धः शौद्धोदनिश्च सः॥

---

शाक्यः *m* name of the family of Buddha
संवर्धनम् *n* bringing up
नियुक्तः *a m.* instructed
निर्वृतिः *f* satisfaction
व्याकुलता *f* perplexion
अत्यवाहयत् *p.* spent
काषाय *A* dyed of a reddish Colour
शाखातरुः *m* branch-tree
विहार *m* Buddhist Temple
गया also बुद्धगया *f a* Sacred place of pilgrimage in Bihar
पिप्पल The holy fig tree
प्रहाण *n* quitting
सरणिः *f* path, way
मारणं *n* killing
निर्वाणं *n* complete extinction of individual of worldly existence
मतं *n* Doctrine,
पामरः *m* low-man
अन्यतमम् *a.n* anyone out of a large number

## २८. विद्यया विन्दते अमृतम्

पुरा धारानगरे भुक्कुण्डो नाम कश्चित् कृतविद्यो धीरश्चोरो बभूव। स कस्याश्चिद्रात्रौ कस्यचिद्वणिजः सदनं प्रविश्य महार्घाणि भूषणानि मुषित्वा गृहं प्रति न्यवर्तत। निभृतं स नगरमार्गे निर्गच्छन्नारक्षकैर्लक्षितो गृहीतश्च ॥

अन्येद्युः प्रातरेव तं निगडितहस्तं ते राजान्तिकं निन्युः। राजा च तमवलोक्य—'कोऽयम्?' इत्यारक्षकानप्राक्षीत्। आरक्षका आहुः—'देव! कुम्भीलकोऽयमतीतायां रात्रौ मणिकारवीथ्यां कस्यचिद्वणिजो वसतिं खातपातमार्गेण प्रविश्य

भूषणानि चोरयित्वा बहिर्गच्छन्नस्माभिर्गृहीत आनीतश्च। श्रुत्वा देवः प्रमाणम्'—इति ॥

तेषां वचः श्रुत्वा राजा कुम्भीलकमपृच्छत्—'रे! अपि सत्यं यदेते कथयन्ति'? मुक्कुण्डस्तावदात्मनः कृत्यं निह्नोतुमशक्नुवन् क्षणं तूष्णीमास्त। भूयः सभ्रूभङ्गं पृष्टः सः—'देव! प्रसीद। अहमतीव दरिद्रोऽस्मि। चौर्येणैव मया जीवनं क्रियते। क्षम्यताम्'—इत्यवदत्। तच्छ्रुत्वा कुपितो राजा वधदण्डं व्यधत्त ॥

सुधीः मुक्कुण्डः दुस्सहाम् इमां राजाज्ञां श्रुत्वा भृशं व्याकुलीभूतोऽपि स्वकवितया दण्डात् आत्मानं मोचयितुमिच्छन् कविषु राज्ञः परमं वात्सल्यं जानानः प्रत्युत्पन्नमतिः निर्भीकः प्राह—

"भट्टिर्नष्टो भारवीयोऽपि नष्टो
भिक्षुर्नष्टो भीमसेनोऽपि नष्टः।
मुक्कुण्डोऽहं भूपतिस्त्वं च राजन्
भम्भावल्यामन्तकः सन्निविष्टः ॥"—इति ॥

तदाकर्ण्य कविवत्सलो राजा-'भो मुक्कुण्ड! दण्डार्होऽपि त्वं सुकविरसीति मया क्षम्यसे। इतः परमीदृशं कर्म मा कार्षीः'—इत्युक्त्वा तेन मुष्टं सर्वं धनं तत्तत्स्वामिभ्यः प्रत्यर्प्य स्वदत्तेन प्रभूतेन वित्तेन तं सम्भावयामास। मुक्कुण्डोऽपि

तदारभ्य त्यक्तचौर्यो राज्ञः प्रीतेः पात्रीभूतः सपुत्रकलत्रः सुखमुवास ॥

अहो! पश्यत विद्याया महिमानम्। तीव्रं दण्डितोऽपि स चोरः विद्यया अमृतत्वम् अविन्दत।!

'किं किं न साधयति कल्पलतेव विद्या' ॥

---

१) प्रश्नाः—१. निभृतं नगरमार्गे निर्गच्छन् क आरक्षकैर्लक्षितो गृहीतश्च? २ किमर्थं स गृहीतः? ३. ते तं राजान्तिकं नीत्वा किमवोचन्? ४. राजा कुम्भीलकं किमपृच्छत्? ५. कुम्भीलकः किमकरोत्? ६. राजा तस्य कीदृशं दण्डं व्यधत्त? ७. भुक्कुण्डो राजानं किं प्राह? ८. राजा तं किमुक्त्वा विससर्ज? ९. अनेन किं गृह्यते?

२) निर्दिष्टलकारैः वाक्यानि पूरयत—

१) भुक्कुण्डः कस्यचिद्वणिजो गृहात् भूषणानि मुष्...लङ्।
२) भुक्कुण्डः प्रथममात्मनः कृत्यं नि + ह्नु...लङ्।
३) राजा तस्य वधदण्ड वि + धा...लिट्।
४) यो बाल्ये विद्यां ग्रह्...लट्, स पश्चात् सुखं वस्...लृट् ॥

३) निभृतम्, प्रमाणम्, तूष्णीम्, वरम्—एतैः वाक्यानि रचयत ॥

४) कृत्प्रत्ययान्ताः—

इ (गतौ) to go—(प्रति) =इतः, इतवान्, यन्, इयानः, इत्वा, (उपेत्य) एतुम्, एतव्यम्, अयनीयम्, एयम्।

अध्ययनार्थस्य 'इ' धातोरप्येवमेव अधिपूर्वकाणि रूपाणि।

The Pre. Part. is अधीयानः.

(ह्नु) to hide-(ह्नुते, निह्नुते)=निह्नुतः, निह्नुतवान्; निह्नुवानः;—, ह्नुत्वा, निह्नुत्य, निह्नोतुम्, निह्नोतव्यम्-निह्नवनीयम्।

५) पर्यायाः—

विद्वान् २२—

विद्वान् विपश्चित् दोषज्ञः सन् सुधीः कोविदो बुधः।
धीरो मनीषी ज्ञः प्राज्ञः संख्यावान् पण्डितः कविः॥
धीमान् सूरिः कृती कृष्टिः लब्धवर्णो विचक्षणः॥
दूरदर्शी दीर्घदर्शी...........॥

---

विन्दते *A* obtains
अमृतम् *n* immortality
कृतविद्य *a* educated
सदन *n* abode
निभृत *in* quietly
आरक्षक *n* Policeman
कुम्भीलक *m* thief
मणिकारवीथी jeweller's street
खातपातमार्ग *m* excavation
निगडितहस्त *a* with arms fettered
देवः *m* प्रमाणम् *n* Your Highness is the sole judge
निह्नोतुम् *in*. to conceal
सभ्रूभङ्गम् *in* knitting eye brows
सुधी *a* intelligent
प्रत्युत्पन्नमति *a* possessed of presence of mind
भृशम् *in*. very much
अन्तक *m* the God of death
मुष्ट *a* stolen
प्रभूत *a* plenty
कल्पलता *f* wish-yielding creeper.

## २९. चाटुश्लोकाः

अगजाननपद्मार्कं गजाननमहर्निशम् ।
अनेकदन्तं भक्तानामेकदन्तमुपास्महे ॥ १

आदिमध्यान्तरहितं दशाहीनं पुरातनम् ।
अद्वितीयमहं वन्दे मद्वस्त्रसदृशं हरिम् ॥ २

वन्दे वाञ्छितलाभाय कर्म किं तन्न कथ्यते ।
किं दम्पतिमिति ब्रूयामुताहो दम्पती इति ॥ ३

सदा वक्रः सदा क्रूरः सदा मानधनापहः ।
कन्याराशिस्थितो नित्यं जामाता दशमो ग्रहः ॥ ४

प्रातर्द्यूतप्रसङ्गेन मध्याह्ने स्त्रीप्रसङ्गतः ।
रात्रौ चौर्यप्रसङ्गेन कालो गच्छति धीमताम् ॥ ५

---

१) टिप्पणम् । चाटुश्लोकाः = रसानन्दजनकाः श्लोकाः—

१) गजाननः अपि अगजाननपद्मार्कः इति विरोधः । अगजायाः पार्वत्याः आननपद्मार्कः इति परिहारः । अनेकदन्तम् एकदन्तम् इति विरोधः । अनेकदं तम् इति पदच्छेदेन परिहारः ॥

२) हरिः वस्त्रं च तुल्ये । वस्त्रस्य दशा (अन्तम्) नास्ति । विष्णोः दशा (बाल्याद्यवस्था) नास्ति ॥

३) दंपतिं दंपती इति उभयथाऽपि वक्तुं न शक्यते । आद्यः व्याकरणरीत्या असाधुः । अन्त्ये अर्थः न युज्यते, यतः अर्धनारीश्वरस्वरूपम् एकम् ।

४) अन्ये ग्रहाः कदाचिदेव वक्राः क्रूराः मानधनापहाश्च । जामाता तु सदा इति विशेषः ॥

५) द्यूतेन स्त्रीसेवया चौर्येण च कालयापनं कुर्वन्तः न धीमन्तो भवेयुः इति विरोधः। द्यूतस्य प्रसङ्गः यस्मिन् स्त्रियाः प्रसङ्गः यस्मिन्, चौर्यस्य प्रसङ्गः यस्मिन् इति विग्रहेण क्रमशः श्रीमन्महाभारतेन, श्रीमद्रामायणेन, श्रीमद्भागवतेन च कालं यापयन्तीति परिहारः ॥

२) प्रश्नाः—१. 'एकदन्तमुपास्महे' कीदृशम् ? २. 'वन्दे हरिम्' कीदृशम् ? ३. कर्मे किं तत्र कथ्यते कुतः ? ४. 'जामाता दशमो ग्रहः' कथम् ? ५. 'कालो गच्छति धीमताम्' केन?

३) लिङः स्थाने तव्य प्रत्ययान्तानि रूपाणि निवेश्य वाक्यानि घटयत—१) सत्यं ब्रूयात् प्रियं ब्रूयान्न ब्रूयात् सत्यमप्रियम् ।
२) न दैवमिति सञ्चिन्त्य त्यजेदुद्योगमात्मनः ।
३) मनोऽभिरामां शृणुयान्नित्यं हरिकथां जनः ॥

४) ल्यबन्तरूपैः वाक्यानि पूरयत—

१) केसरिणः करिणां मूर्धानम् आ + रुह्...तेषां गण्डौ भिन्दन्ति ।

२) आरुणिः केदारखण्डात् सहसा उत्+स्था...समागतः ।

३) महात्मानो भुवम् अव+तॄ...परहितार्थमात्मानमर्पयन्ति।

४) दीर्घकर्णः पक्षिशावकान् आ+क्रम्....कोटरम् आ+नी.. चखाद ॥

५) उपसर्गयोगादर्थभेदः—

आस्—आस्ते-अध्यास्ते, अन्वास्ते, उपास्ते, उदास्ते ॥

६) नानार्थाः—दशाऽवस्थादीपवर्त्योः वस्त्रान्ते भूम्नि योषिति॥
—इति मेदिनी कोशः

७) पर्यायाः—

वस्त्रम् ६—वस्त्रमाच्छादनं वासः चेलं वसनमंशुकम् ।
वक्रम् ११—"अरालं वृजिनं जिह्मम् ऊर्मिमत्कुञ्चितं नतम् ।
आविद्धं कुटिलं भुग्नं वेल्लितं वक्रमित्यपि ॥

---

चाटुश्लोक *m* humorus verse
अगजा *f* born of a mountain (पार्वती)
अनेकद *a* bestower of many things
एकदन्त *a* one-toothed
दशाहीन *a* (1) he who has no stages of life
(2) that which has no edge
अद्वितीय *a* (I) matchless
(1) without a second
वाञ्छित *a* desired object. कन्याराशिस्थित *m* This Planet of जामाता is always in the sixth sign of कन्या (daughter) in राशिचक्र i. e., He is always with कन्या, his wife.
द्यूतप्रसङ्ग *m* (1) attachment in gambling
(2) श्रीमन्महाभारत (in which story of the द्यूत is described)
स्त्रीप्रसङ्ग *m* (1) association with women
(2) श्रीमद्रामायण
चौर्यप्रसङ्ग *m* (1) attachment with theft
(2) श्रीमद्भागवत

---



## ३० वाराणसीक्षेत्रम्

सन्ति खलु भारतवर्षे तत्र तत्र बहूनि तीर्थक्षेत्राणि । तेषु-अयोध्या, मथुरा, माया, काशी, काञ्ची, अवन्तिका, द्वारवतीत्येतानि प्रधानभूतानि । तत्रापि वाराणसी पुराणेष्वतिशयेन वर्ण्यमानमनुत्तमं पुण्यक्षेत्रम् । सैव काशीत्युच्यते । सैषा भारतवर्षस्य पूर्वोत्तरभागेऽवतिष्ठते ; यस्याः परिसरे पुण्यसलिला भागीरथी प्रवहति ॥

गङ्गायां स्नानेन तत्तीर्थपानेन वा जनाः पूतात्मानो मुक्तिं प्राप्नुवन्तीति वेदाः पुराणानि चोद्घोषयन्ति ॥

उक्तं च 'भजगोविन्दे' श्रीशङ्करभगवत्पादैः—

भगवद्गीता किञ्चिदधीता गङ्गाजललवकणिका पीता ।
सकृदपि येन मुरारिसमर्चा क्रियते तस्य यमेन न चर्चा ॥

अतो भारतवर्षस्य सर्वाभ्यो दिग्भ्यः सर्वेभ्यो देशेभ्यश्च स्त्रियः पुरुषा बाला वृद्धाश्च गङ्गास्नानार्थं काशीं गच्छन्ति । गत्वा च तत्र नद्यां स्नात्वा भगवन्तं श्रीज्योतिर्लिंगमूर्तिं विश्वनाथं पश्यन्ति अर्चन्तिच ॥

गङ्गायास्तीरे निबद्धाः सुन्दराः सुविशालाश्च तीर्थशिलाः सततं जनैराकीर्णा उपलभ्यन्ते । एकत्र वैष्णवाः, अन्यत्र शैवाः, अपरत्र मतान्तरीयाश्च स्वस्वचिह्नानि धरन्तः कुशहस्ताः पञ्च-पात्रपाणयो जपन्तो ध्यायन्तश्च तीर्थशिलामलङ्कुर्वन्ति । अन्यत्र केचिदूर्ध्वबाहवः पादाग्रेण तिष्ठन्त उद्यन्तं सूर्यमेकाग्रेण मनसा ध्यायन्ति । अपरे केचन कृतप्राणायामाः पशुपतिं ध्यायन्ति । इत्थमेषा वाराणसी सत्कर्मणामायतनं धर्माणामावासभूमिश्च दृश्यते ॥

वाराणस्येषा बहुभूमिकैरत्युच्छ्रतैर्मन्दिरैः संशोभते । विशेषतश्च नद्यास्तीरे सुप्रतिष्ठिता गृहपङ्क्तिः महतीं शोभां बिभर्ति । नगरमिदं पुरा हाटकमयं बभूवेति श्रूयते । इदानीं तु केवलं शिलामयं दृश्यते । गङ्गा च स्नानघट्टानामग्रतः परः सहस्रैर्बाष्पप्रवहणैः महानौकाभिश्चाभिव्याप्ता विलसति । काशी-नगरस्य सुषमा नदीगतं प्रवहणमारूढैर्निरीक्षणीया ॥

काशीक्षेत्रमिदं भारतीयविद्यायाः कुलभवनमिवाभाति। यतो ह्यत्र वेदाः पुराणानि शास्त्राणि च यथापुरमद्यत्वेऽपि सश्रद्धमधीयन्ते हिन्दुमहाविश्वविद्यालये जनैः। पण्डित श्रीमदन मोहन माळवीयमहाशयैः प्रतिष्ठापितः हिन्दु महाविश्वविद्यालयः अत्र सुतरां चकास्ति। अत्रत्यं विद्यापीठमधिरूढो जनः समस्तविद्यापारगत्वेन परिगण्यते। अत्र जनानां जीवितान्तिमक्षणे भगवान् विश्वनाथः कर्णे तारकमन्त्रम् उपदिशति, येन ते मुक्तिभाजो भवन्ति इत्यहो वाराणसीक्षेत्रमहिमा ॥

---

१) प्रश्नाः—१. भारतवर्षे प्रधानभूतानि पुण्यक्षेत्राणि कानि? २. वाराणसी कीदृशं पुण्यक्षेत्रम्? ३. के किमिति गङ्गास्नानार्थं काशीं गच्छन्ति? ४ गङ्गातीरगतास्तीर्थशिलाः कीदृशैर्जनैराकीर्णा उपलभ्यन्ते? ५. काशीनगरस्य शोभा कीदृशी? ६. क्षेत्रमिदं कस्याः कुलभवनम्?

२) प्रयोगं विपरिणमयत—

१) नद्यास्तीरे विद्यमाना गृहपङ्क्तिर्महतीं शोभां बिभर्ति।

२) वेदाः शास्त्राणि पुराणानि च सश्रद्धमधीयन्ते जनैः।

३) निर्दिष्टैर्लकारैः वाक्यानि पूरयत—

१) वसन्ते पद्मानि परां शोभां भू…लट्।

२) स्त्रियो भूषणैरात्मानम् अलं + कृ…लट्।

४) अनुत्तमम्, अमूल्यम्, अनर्घम्—एतैः वाक्यानि रचयत ॥

५) कृत्प्रत्ययान्ताः—

ध्यै to meditate—(ध्यायति) = ध्यातः, ध्यातवान्, ध्यायन्, ध्यायमानः, ध्यात्वा, अनुध्याय, ध्यातुम्, ध्यातव्यम्, ध्यानीयम्, ध्येयम्।

भृ to bear—(बिभर्ति) =भृतः, भृतवान्, बिभ्रत्, भ्रियमाणः, भृत्वा, (सम्भृत्य) भर्तुम्, भर्तव्यम्, भरणीयम्।

पू to purify—(पुनाति, पुनीते) =पूतः, पूतवान्, पुनन्, पुनानः, पूयमानः, पूत्वा, परिपूय, पवितुम्, पवितव्यम्, पवनीयम्, पाव्यम् ॥

७) उपसर्गयोगात् परस्मैपदम् — वह् (वहति, वहते) प्रवहति ॥

८) पर्यायाः—

गङ्गा ८—गङ्गा, विष्णुपदी, जह्नुतनया, सुरनिम्नगा।
भागीरथी, त्रिपथगा, त्रिस्रोताः, भीष्मसूरपि ॥

शोभा४—सुषमा परमा शोभा ; शोभा कान्तिद्युतिश्छविः।
परमा शोभा = सुषमा इत्यर्थः (Exquiste beauty)

मोक्षः८—मुक्तिः कैवल्यनिर्वाणश्रेयोनिःश्रेयसामृतम्।
मोक्षोऽपवर्गः।

अज्ञानम् ३—अथाज्ञानम् अविद्याऽहंमतिः स्त्रियाम् ॥

---

अयोध्या *f* the modern Oudh

मथुरा *f* the birth place of Lord Krishna

माया *f* Name of Gaya

काशी *f* Benares

द्वारवती *f* Dwaraka

अवन्तिका *f* the modern उज्जयिनी

काञ्ची Name of an ancient City in South India.

अनुत्तम *a* peerless; having no superior

मुरारि *m* Lord Vishnu

समर्चा *f* worship

तीर्थशिला *f* step of bathing ghat

प्राणायाम *m* controlling the breath
पशुपति *m* Lord Siva
आयतन *n* abode
हाटक *n* gold
उच्छ्रित *a* huge
यथापुरं *ind.* as before
कुलभवन *n* family house

## २१. श्रीशङ्कराचार्यः



जगद्गुरुः श्रीशङ्कराचार्यः केरलेषु चूर्णीनद्यास्तटे विद्य-

मान कालटिनामकं जनपदं स्वजन्मना व्यभूषयत । तस्य पिता परमभागवतः शिवगुरुः, माता च धर्मशीला आर्याम्बा । सोऽयमाचार्यः अष्टाशीत्युत्तरसप्तशततमे क्रिस्त्वब्दे नन्दनवत्सरे वैशाखमासे शुक्लपञ्चम्यां तिथौ पुनर्वसुनक्षत्रेऽभिजिन्मुहूर्ते भुवमवातरत् ॥

स यदा पञ्चहायनोऽभूत् तदा तस्य पिता शिवगुरुर्दैवदुर्विपाकात् कालधर्मं गतः । आर्याम्बा च पत्युर्वियोगेन खिन्नाऽपि सुतस्य भविकमनुध्यायन्ती तस्थौ । बालकस्य च विद्याग्रहणे निरतिशयं पाटवं वीक्ष्य सा तस्मिन्नेव वत्सरे बन्धुभिस्तस्योपनयनं कारयामास । अनुपदमेव गुरुकुलमुपनीतः स बालको द्वित्रैरेव वर्षैः सर्वान् वेदान् वेदाङ्गानि विविधाः भाषाश्चाध्यगीष्ट ॥

अधीत्य च सर्वाणि शास्त्राण्यष्टहायनः कुमारो जगदिदं मृगतृष्णिकायास्तुल्यमाकलयन् संन्यासग्रहणे मतिं बबन्ध । तदेकपुत्रा माता च तस्येच्छां नान्वमन्यत । अथापि स एकस्मिन्नहनि आत्मानं नक्रगृहीतम् अभिनयन्, संन्यासस्वीकरणे नक्राद्विमुक्तिं बोधयन् कथञ्चित् तां सान्त्वयन्नन्ततस्तयाऽनुमतो गृहात् प्रस्थितः संन्यासस्य दातारं गुरुमन्विष्यन् वाराणसीमगच्छत् । तत्र च गोविन्दाचार्यं नाम महासंयमिनं शरणमुपेत्य तस्मात् संन्यासमधिगत्य तस्यैव सविधे वेदान्तमध्यैत ॥

गोविन्दाचार्यस्तं कञ्चित् कालमध्यापयन् तस्य प्रतिभाशक्त्या विस्मितस्तं साक्षाच्चराचरगुरोः शङ्करस्यावतारममन्यत;

आदिशच्चैनं पाखण्डैरभिभूयमानस्य सनातनस्य सद्धर्मस्य परिपालनाय ॥

शिरसा वहन् गुरोराज्ञां श्रीशङ्कराचार्यः सर्वत्र पुण्यक्षेत्रेषु सञ्चरन्नुपनिषद्भिरुपदिश्यमानमद्वैतं लोके प्रचारयामास। आवर्जयामास मधुरमधुरया वाग्धोरण्या जनतायाश्चेतांसि। खण्डयामास नास्तिकानां मतानि। स्थापयामास सर्वत्रास्तिकानां सम्मतं सद्धर्मम्। रचयामास हृद्यया शैल्या सूत्रभाष्यादिकान् परः शतान् ग्रन्थान् विविधानि स्तोत्ररत्नानि च। अध्यापयामास च नानादिग्भ्यः समागतान् परःसहस्रान् शिष्यान्। तेषु प्रधानभूताः—पद्मपादाचार्यः, सुरेश्वराचार्यः, हस्तामलकाचार्यः, तोटकाचार्यः इति चत्वारः शिष्याः ॥

तदनु श्रीशङ्कराचार्यो महता यत्नेनोज्जीवितस्य सद्धर्मस्य स्थिरप्रतिष्ठार्थं बदर्यां जगन्नाथे काञ्च्यां द्वारकायां च मठान् प्रतिष्ठाप्य तत्र धर्मप्रवचनाय तान् शिष्यान् न्ययुङ्क्त। स्वयं च महीशूरदेशान्तर्गते शृङ्गगिरौ प्रतिष्ठापितं मठमधिष्ठाय पाठप्रवचनादिकं कुर्वन्नासाञ्चक्रे। यद्यप्ययं योगीश्वरो विष्णुशिवयोरभेदमातिष्ठत, तथाप्यस्य भगवति शिवे महती भक्तिरासीत्। अत एव तदनुगामिनो जनाः प्रायेण शिवभक्ताः एवोपलभ्यन्ते ॥

श्रीशङ्कराचार्योऽयमल्पीयसैव कालेन आसेतुहिमाचलं स्वीयं नित्यशुद्धं यशो विस्तार्य द्वात्रिंशे वयसि केदारनाथक्षेत्रे समाधिमास्थाय परं धाम प्रपेदे। तेन प्रतिष्ठापितो मतधर्मश्चाद्य

यावत् समुल्लसति सर्वत्र भारते वर्षे। तत्राप्ययं दक्षिणापथे सविशेषः प्रचरति ; यत्र हि परमकारुणिकाः श्रीकाञ्चीकामकोटि-पीठाधिपतयः श्रीशृङ्गगिरि शारदापीठाधिपतयश्च धर्मसंस्थापनार्थाय देशाद्देशं व्रजन्तः शिष्यानुपदिशन्तः अधर्ममुच्चाटयन्तश्चाद्वैतमतं श्रद्धया परिपालयन्तः प्रचारयन्तश्च चकासति ॥

---

१) प्रश्नाः—श्रीशंकराचार्यस्य शैशवं संन्यसनं चाधिकृत्य किं जानीध्वे ? २. स कस्य सविधे वेदान्तमध्यैत ? ३. गुरुस्तं कस्मिन् कर्मणि न्ययुङ्क्त ? ४. गुरोराज्ञां शिरसा वहन्नाचार्यः किं चकार ? ५. तस्य प्रधानभूताः शिष्याः के ? ६. सद्धर्मस्य स्थिरप्रतिष्ठार्थं स किमकरोत् ? स कदा कुत्र परं धाम प्रपेदे ? तेन प्रतिष्ठापितो मतधर्मः कथम्भूतो वर्तते ?

२) निर्दिष्टलकारैः वाक्यानि पूरयत—

१) विरक्तचित्तो नरः संन्यासग्रहणे मतिं बन्ध्....लट् ।

२) स द्वित्रैरेव वर्षैर्वेदान् वेदाङ्गानि च अधि + इ...लङ्

३) केदारनाथक्षेत्रे स परं धाम प्र + पद्...लङ् ।

४) तदेकपुत्रा जनयित्री तस्येच्छां न अनु + मन्...लिट् ॥

३) उपसर्गयोगादात्मनेपदम्

स्था—तिष्ठति। आतिष्ठते, संतिष्ठते, अवतिष्ठते, प्रतिष्ठते, वितिष्ठते, उपतिष्ठते ॥

४) उप + गत्वा, उप + इत्वा, अधि + इत्वा, अधि + स्थित्वा आ + स्थित्वा, आ + कृष्ट्वा, सं + गृहीत्वा, अव + आप्त्वा —एषां ल्यबन्तरूपाणि लिखत ॥

५) जनानां समूहः = जनता । ग्रामाणां समूहः = ग्रामता ।
बन्धूनां समूहः = बन्धुता । एवं सहायता, गजता ।

६) उदयते, आस्ते, ईक्षते, ईहते-एषां लिटि रूपाणि निर्दिशत ॥

७) पर्यायाः—

नित्यः ५—शाश्वतस्तु ध्रुवो नित्य सदातन सनातनाः ।
तीक्ष्णम् ३ — तिग्मं तीक्ष्ण खरम् ।
मृगतृष्णा २—मृगतृष्णा मरीचिका ॥

---

परमभागवत *n* great devotee

अभिजिन्मुहूर्त *m* the 8th मुहूर्त of the day comprising 24 minutes before and 24 minutes after noon

पञ्चहायन *a* five years of age

कालधर्म *m* death

भविक *n* prosperity, welfare

निरतिशय *a* unsurpassed, matchless

पाटव *n* cleverness, skill

मृगतृष्णिका *f* mirage

प्रतिभा *f* vivid imagination

पाखण्ड, पाषण्ड *n* heretic

वाग्धोरणी *f* continuous flow of words

जनता *f* mankind

महीशूरदेश *m* Mysore State

शृङ्गगिरि *m* Sringeri Town

आतिष्ठत *A* acknowledged

परंधामन् *n* the higher or superior abode.

## ३२. सुभाषितावलिः—प्रथमं दशकम्

भाषासु मुख्या मधुरा दिव्या गीर्वाणभारती ।
तस्माद्धि काव्यं मधुरं तस्मादपि सुभाषितम् ॥ १

द्राक्षा म्लानमुखी जाता शर्करा चाश्मतां गता ।
सुभाषितरसस्याग्रे सुधा भीता दिवं गता ॥ २

किं कुलेन विशालेन शीलमेवात्र कारणम् ।
भवन्ति नितरां स्फीताः सुक्षेत्रे कण्टकिद्रुमाः ॥ ३

सर्वत्र गुणवान् देशे चकास्ति प्रथतेतराम् ।
मणिर्मूर्ध्नि गले बाहौ पादपीठेऽपि शोभते ॥ ४

गुणैरुत्तुङ्गतां याति नोच्चैरासनसंस्थितः ।
प्रासादशिखरस्थोऽपि काकः किं गरुडायते ॥ ५

गुणेषु क्रियतां यत्नः किमाटोपैः प्रयोजनम् ।
विक्रीयन्ते न घण्टाभिर्गावः क्षीरविवर्जिताः ॥ ६

गुणानामन्तरं प्रायस्तज्ज्ञो जानाति नेतरः ।
मालतीमल्लिकामोदं घ्राणं वेत्ति न लोचनम् ॥ ७

निर्गुणेष्वपि सत्त्वेषु दयां कुर्वन्ति साधवः ।
न हि संहरते ज्योत्स्नां चन्द्रश्चण्डालवेश्मनः ॥ ८

बलवानपि निस्तेजाः कस्य नाभिभवास्पदम् ।
निश्शङ्कं दीयते लोकैः पश्य भस्मचये पदम् ॥ ९

न प्रयत्नशतेनापि दुर्जनः सुजनो भवेत् ।
किं मर्दितोऽपि कस्तूर्या लशुनो याति सौरभम् ॥ १०

---

१) प्रश्नाः—१. काव्यं कस्मात् मधुरम्? २. सुभाषितरस-स्याग्रे द्राक्षा शर्करा सुधा च किमकुर्वन्? ३. 'भवन्ति नितरां स्फीताः' के? कुत्र? ४. 'चकास्ति प्रथतेतराम्' कः कुत्र? ५. 'गुणैरुत्तुङ्गतां याति नोच्चैरासनसंस्थितः' कोऽत्र दृष्टान्तः? ६. विक्रीयन्ते न घण्टाभिः' काः? ७. 'तज्ज्ञो जानाति नेतरः' किम्? ८. 'न हि संहरते' ज्योत्स्नां चन्द्रश्चण्डालवेश्मनः किमत्र दार्ष्टान्तिकम्? ९. 'कस्य नाभिभवास्पदम्' काः? १०. 'न सुजनो भवेत्' कः? कथम् अपि? अत्र दृष्टान्तः कः?

२) प्रयोगं विपरिणमयत—

१) गुणानामन्तरं प्रायस्तज्ज्ञो जानाति नेतरः।

२) निर्गुणेष्वपि सत्वेषु दयां कुर्वन्ति साधवः॥

३) उपसर्गयोगादात्मनेपदम्—

क्री-क्रीणाति, क्रीणीते। विक्रीणीते, परिक्रीणीते, अवक्रीणीते

४) नामधातुः—गरुड इव आचरति = गरुडायते। एवं काकायते पिकायते, शुकायते, सिंहायते, इत्यादिकम्॥

५) कृत्प्रत्ययान्ताः—

या to go—(याति) = यातः, यातवान्, यान्, यायमानः यात्वा, अनुयाय, यातुम्, यातव्यम्, यानीयम्॥

६) पर्यायाः—

वृहत् ६—विशङ्कटं पृथु वृहत् विशालं पृथुलं महत् ।
कारणम् ३—हेतुर्ना* कारणं बीजम् । (*ना = पुंलिङ्गः)
निदानम् २—निदानं त्वादिकारणम् ॥

---

सुभाषितावळि *N. f. A.* collection of wise sayings

1 गीर्वाण *m* Devas

भारती *f* language

2 म्लानमुखी *f* which has the appearance of faded leaves

अश्मता *f* the state of being a stone

सुधा *f* Nector. This is said to exist in heaven now-a-days

3 कण्टकिद्रुम *m* tree with thorns

स्फीत *a* grown largely

4 चकास्ति *P* shines

प्रथतेतराम् *A.* becomes highly famous

मूर्धन् *m* head

गल *n* Neck

पादपीठ Foot-stool

5 उत्तुङ्गता *f* Height

गरुडायते *A.* acts like गरुड

6 आटोप *m* self-conceit

न *in* विक्रीयन्ते *A.* are not sold

अन्तर *n* difference

आमोद *m* fragrance

8 सत्व *m* a thing or a living being

ज्योत्स्ना *f* Moon-light

वेश्मन् *n* house

9 अभिभावास्पद *n* an object of contemptuous treatment

भस्मचय *N. m* heap of ash

10 मर्दित *a* Rubbed

कस्तूरी *f* Musk

लशुन *m. n.* Garlic

सौरभं *n* fragrance.

## सुभाषितावळिः—द्वितीयं दशकम्

खलः करोति दुर्वृत्तं नूनं फलति साधुषु ।
दशाननोऽहरत् सीतां बन्धनं तु महोदधेः ॥ १
निन्दां यः कुरुतेऽन्येषां तेन स्वं दूषयत्यसौ ।
खे भूतिं यस्त्यजेदुच्चैर्मूर्ध्नि तस्यैव सा पतेत् ॥ २
अहो दुर्जनसंसर्गान्मानहानिः पदे पदे ।
पावको लोहसङ्गेन मुद्गरैरभिहन्यते ॥ ३
महाजनस्य संसर्गः कस्य नोन्नतिकारकः ।
रथ्याम्बु जाह्नवीसङ्गात् त्रिदशैरभिवन्द्यते ॥ ४
स्थिरा शैली गुणवतां खलबुद्ध्या न बाध्यते ।
रत्नदीपस्य हि शिखा वात्ययाऽपि न शाम्यते ॥ ५
उपकर्तुं यथा स्वल्पः समर्थो न तथा महान् ।
प्रायः कूपस्तृषां हन्ति सततं न तु वारिधिः ॥ ६
विद्वानेव विजानाति विद्वज्जनपरिश्रमम् ।
न हि वन्ध्या विजानाति गुर्वीं प्रसववेदनाम् ॥ ७
यस्य नास्ति स्वयं प्रज्ञा शास्त्रं तस्य करोति किम् ।
लोचनाभ्यां विहीनस्य दर्पणः किं करिष्यति ॥ ८
यस्य नास्ति विवेकस्तु केवलं यो बहुश्रुतः ।
न स जानाति शास्त्रार्थान् दर्वी पाकरसानिव ॥ ९
लक्ष्मीवन्तो न जानन्ति प्रायेण परवेदनाम् ।
शेषे धाराभरक्रान्ते शेते नारायणः सुखम् ॥ १०

१) प्रश्नाः—१. 'नूनं फलति साधुषु ? किम् ? कः सीतामहरत् ? तेन कस्य किं जातम् ? २. तेन स्वं दूषयत्यसौ' केन? 'मूर्ध्नि तस्यैव सा पतेत्' का ? कस्य ? ३. 'मुद्गरैरभिहन्यते ' कः ? ४. 'त्रिदशैरभिवन्द्यते ' किम् ? ५. 'खलबुद्ध्या न बाध्यते' का ? ६. समर्थो न तथा महान्' किं कर्तुम् ? ७. 'विद्वानेव विजानाति' किम् ? ८. 'शास्त्रं तस्य करोति किम्' कस्य ? ९. 'न स जानाति शास्त्रार्थान्' कः ? १०. 'शेते नारायणः सुखम्' कुत्र ? तेन किं ज्ञायते ?

२) प्रयोगं विपरिणमयत—

१) खे भूतिं यस्त्यजेदुच्चैर्मूर्ध्नि तस्यैव सा पतेत्।
२. पावको लोहसङ्गेन मुद्गरैरभिहन्यते।
३. रथ्याम्बु जाह्नवीसङ्गात् त्रिदशैरभिवन्द्यते ॥

३) शतृप्रत्ययान्तैः पदैः वाक्यानि पूरयत—

१. परवेदनां (न ज्ञा)...नारायणो धाराभराक्रान्ते शेषे शेते।
२. दुर्जनैः सह संसर्गं (कृ)...जनो मानहानिं प्राप्नोति।
३. कूपो जनानां तृषां (नि+हन्)...वारिधिमतिशेते ॥

४) कृत्प्रत्ययान्ताः—

शी to sleep (शेते)=शयितः, शयितवान्, शयानः, अतिशय्यमानः, शयित्वा, अतिशय्य, शयितुम् शयितव्यम्, शयनीयम्।

डी to fly—(डयते)=डयितः, डयितवान्, डयमानः,—डयित्वा, उड्डीय, डयितुम्, डयितव्यम्, डयनीयम् ॥

५) पर्यायाः—गर्वः ३—गर्वोऽभिमानोऽहङ्कारः।

मानः २—मानश्चित्तसमुन्नतिः।

अवमानः ९—अनादरः परिभवः परीभावः तिरस्क्रिया। रीढावमाननावज्ञावहेलनमसूक्षणम् ॥

---

1 दुर्वृत्त *a* wicked, ill-mannered
2 भूति *f* Ashes
3 पावक *m* Fire
मुद्गर *m* hammer
4 रथ्याम्बु *n* the water of a road
त्रिदश *m* God
5 शैली *f* conduct
शिखा *N. f.* flame
वात्या *N. f.* whirl wind
6 स्वल्प *a* insignificant
तृषा *f* thirst
7 वन्ध्या *f* barren woman
गुर्वी *a. f.* great
8 दर्पण *m* mirror
9 बहुश्रुत *a* very learned
दर्वी *f* ladle, spoon
16 लक्ष्मीवत् *a* possessed of Lakshmi; also wealth

---

## सुभाषितावळिः—तृतीयं दशकम्

गुणवन्तः क्लिश्यन्ते प्रायेण भवन्ति निर्गुणाः सुखिनः ।
बन्धनमायान्ति शुकाः यथेष्टसञ्चारिणः काकाः ॥ १

अतिपरिचयादवज्ञा भवति विशिष्टेऽपि वस्तुनि प्रायः ।
लोकः प्रयागवासी कूपस्नानं सदाऽऽचरति ॥ २

साम्नैव यत्र सिद्धिर्न तत्र दण्डो बुधेन विनियोज्यः ।
पित्तं यदि शर्करया शाम्यति कोऽर्थः पटोलेन ॥ ३

नीचो वदति न कुरुते न वदति सुजनः करोत्येव ।
शरदि न वर्षति गर्जति वर्षति वर्षासु निस्वनो मेघः ॥ ४

सुजनो न याति वैरं परहितनिरतो विनाशकालेऽपि ।
छेदेऽपि चन्दनतरुः सुरभयति मुखं कुठारस्य ॥ ५

वनेऽपि सिंहा गजमांसभक्षिणो
बुभुक्षिता नैव तृणं चरन्ति ।
एवं कुलीना व्यसनाभिभूताः
न नीचकर्माणि समाश्रयन्ति ॥ ६

वरं दरिद्रः श्रुतिशास्त्रपारगो
न चापि मूर्खो बहुरत्नसंयुतः ।
सुलोचना जीर्णपटाऽपि शोभते
न नेत्रहीना कनकैरलङ्कृता ॥ ७

बोधितोऽपि बहुसूक्तिविस्तरैः
किं खलो जगति सज्जनो भवेत् ।
स्नापितोऽपि बहुशो नदीजलै-
र्गर्दभः किमु हयो भवेत् क्वचित् ? ॥ ८

सम्पूर्णकुम्भो न करोति शब्द-
मर्धो घटो घोषमुपैति नित्यम् ।
विद्वान् कुलीनो न करोति गर्व-
मल्पो जनो जल्पति साट्टहासम् ॥ ९

क्षारं जलं वारिमुचः पिबन्ति
तदेव कृत्वा मधुरं वमन्ति ।
सन्तस्तथा दुर्जनदुर्वचांसि
पीत्वा च सूक्तानि समुद्गिरन्ति ॥ १०

१) प्रश्नाः—१. गुणवन्तो निर्गुणाश्च कीदृशा वर्तन्ते २. 'अति-परिचयादवज्ञा' इमामुक्तिं दृष्टान्तेन समर्थयत? ३. 'न तत्र दण्डो बुधेन विनियोज्यः' कुत्र? ४. नीचसुजनयोः स्वभावः कीदृशः? ५. 'सुरभयति मुखं कुठारस्य' कः? ६. 'न नीच-कर्माणि समाश्रयन्ति' के? ७. 'वरं दरिद्रः श्रुतिशास्त्रपारगो न चापि मूर्खो बहुरत्नसंयुतः' कोऽत्र दृष्टान्तः? ८. स्नापि-तोऽपि बहुशो नदीजलैः गर्दभः किमु हयो भवेत् क्वचित्' इदं दार्ष्टान्तिके योजयत। ९. कुलीनस्याल्पस्य च को विशेषः? १०. 'पीत्वा च सूक्तानि समुद्गिरन्ति' के? के इव?

२) प्रयोगं विपरिणमयत—

१) प्रयागवासी लोकः सदा कूपस्नानमाचरति।
२) कुलीनाः व्यसनाभिभूताः नीचकर्माणि न समाश्रयन्ति।
३) सन्तो दुर्जनानां दुर्वचांसि पीत्वा सूक्तानि समुद्गिरन्ति॥

३) यथासम्भवं क्त्वाप्रत्ययान्तानि रूपाणि निवेश्य वाक्यानि घटयत—

१) नीचो वदति न कुरुते न वदति सुजनः करोत्येव।
२) खलः परेषां निन्दां कुरुते तेनात्मानं दूषयति च।
३) जनाः काशीं गच्छन्ति गङ्गायां स्नान्ति विश्वनाथमर्चन्ति च।
४) रामः पितुराज्ञां शिरसोवाह वनं च जगाम॥

४) 'लोट्' रूपैः वाक्यानि पूरयित्वा श्लोकं पठत—

तृष्णां छिद्...भज्...क्षमां हन्...मदं मा धा...पापे मनः
सत्यं ब्रू...अनुया...साधुपदवीं सेव्...विद्वज्जनान्।
मान्यान् मान्...विद्विषोऽप्यनुनी...प्रच्छाद्...स्वान् गुणान्
कीर्तिं पाल्...दुःखिते कु...दयामेतत्सतां लक्षणम्॥

५) नामधातुः—सुरभिं करोति = सुरभयति। एवं मलिनयति, उष्णयति, शीतयति, दीर्घयति—इत्यादिकं भवति ॥

६) पर्यायाः—

चन्दनः ४—गन्धसारो मलयजो भद्रश्रीश्चन्दनोऽस्त्रियाम्।
मेघः २५—अभ्रं मेघो वारिवाहः स्तनयित्नुर्बलाहकः।
धाराधरो जलधरः तडित्वान् वारिदोऽम्बुदः।
घनजीमूतमुदिर जलमुग्धूमयोनयः ॥

---

1 बन्धन *n* bondage

2 अवज्ञा *f* disrespect

3 सामन् *n* pacific measure

सिद्धि *f* complete attainment

पित्त *n* bile

शर्करा *f* candied sugar

पटोल *m* a species of cucumber

4 शरद् *f* the autumn

निःस्वन *a* noiseless

5 चन्दनतरु *m* sandal tree

सुरभयति *P*. makes odorous

6 कुलीन *a* Born of a noble family

व्यसन *n* distress

7 सुलोचना *f* beautiful eyed

कनक *n* gold-ornament

8 गर्दभ *m* ass

हय *m* horse

9 सम्पूर्णकुम्भ *m* full pot

घोष *m* loud noise

साट्टहासं *in* with a loud laughter

10 क्षार *a* saline

वारिमुच् *m* cloud

सूक्त *n* good speech.

# पर्यायपदानां वर्णानुक्रमणिका


| पर्यायसंख्या | नामानि | पृष्ठम् | पर्यायसंख्या | नामानि | पृष्ठम् |
|---|---|---|---|---|---|
| 4 | अगस्त्यः | 19 | 12 | नदी | 62 |
| 3 | अज्ञानम् | 102 | 6 | नयनम् | 3 |
| 4 | अतिथिः | 80 | 5 | नित्यः | 107 |
| 9 | अवमानः | 112 | 2 | निदानम् | 110 |
| 10 | असुरः | 49 | 27 | पक्षी | 23 |
| 16 | आकाशः | 71 | 17 | पद्मम् | 16 |
| 4 | आपणः | 56 | 6 | पर्णम् | 11 |
| 3 | आहारः | 58 | 3 | पर्कटी | 80 |
| 5 | इन्द्राणी | 19 | 2 | पुरोहितः | 71 |
| 5 | उदरम् | 58 | 5 | पुष्पम् | 16 |
| 4 | उष्ट्रः | 46 | 6 | प्रभातम् | 76 |
| 5 | कदली | 39 | 2 | प्राणाः | 13 |
| 1 | कबलः | 58 | 22 | बुद्धः | 91 |
| 3 | कारणम् | 110 | 14 | बुद्धिः | 35 |
| 8 | गङ्गा | 102 | 6 | बृहत् | 110 |
| 3 | गर्वः | 112 | 6 | भाग्यम् | 68 |
| 5 | गुरुः | 29 | 4 | मकरन्दः | 52 |
| 4 | चन्दनः | 116 | 1 | मत्सरः | 32 |
| 3 | तीक्ष्णम् | 107 | 3 | मधु | 52 |
| 4 | दिनान्तः | 76 | 9 | मधुकरः | 52 |
| 8 | दैवज्ञः | 26 | 2 | मानः | 112 |
| 5 | नगरम् | 56 | 5 | मार्जारः | 80 |

| पर्यायसंख्या | नामानि | पृष्ठम् | पर्यायसंख्या | नामानि | पृष्ठम् |
|---|---|---|---|---|---|
| 2 | मृगतृष्णा | 107 | 22 | विद्वान् | 95 |
| 15 | मेघः | 116 | 5 | शिष्यः | 29 |
| 5 | मेरुः | 68 | 4 | शोभा | 102 |
| 8 | मोक्षः | 102 | 6 | सखा | 76 |
| 2 | यजमानः | 71 | 6 | सज्जनः | 87 |
| 7 | यशः | 29 | 6 | सदृशः | 87 |
| 7 | यज्ञः | 71 | 26 | सर्पः | 19 |
| 5 | यानम् | 66 | 15 | समुद्रः | 62 |
| 4 | रसातलम् | 68 | 12 | सुन्दरम् | 56 |
| 1 | राजहंसः | 43 | 4 | संपत् | 84 |
| 3 | लोभः | 32 | 6 | संवत्सरः | 11 |
| 6 | लोभी | 32 | 4 | सर्वतः | 66 |
| 11 | चक्रम् | 98 | 6 | सिंहः | 7 |
| 3 | वटः | 80 | 4 | हंसः | 43 |
| 6 | वस्त्रम् | 98 | 7 | हिमम् | 84 |
| 9 | वानरः | 26 | | | |

आहत्य पर्यायपदानि—75

# कृत्प्रत्ययान्तानां धातूनां वर्णानुक्रमणिका


| धातुः | पृष्ठम् |
|---|---|
| अस् | 43 |
| आप् | 67 |
| इ | 94 |
| कृ | 13 |
| कृष् | 26 |
| कॄ | 62 |
| क्षिप् | 19 |
| क्रुध् | 71 |
| गाह् | 83 |
| ग्रह् | 11 |
| चक्ष् | 42 |
| चि | 80 |
| जि | 3 |
| ज्ञा | 3 |
| डी | 112 |
| तप् | 86 |
| तुष् | 32 |
| तॄ | 62 |
| त्यज् | 38 |
| दा | 76 |
| धा | 76 |
| ध्यै | 101 |
| नम् | 49 |
| नी | 65 |
| पच् | 39 |
| पद् | 80 |
| पा | 11 |
| पिष् | 26 |
| पू | 102 |
| प्री | 32 |
| बन्ध् | 29 |
| बुध् | 22 |
| भज् | 58 |
| भुज् | 58 |
| भृ | 104 |
| मन् | 19 |
| मुच् | 16 |
| मृ | 13 |
| या | 109 |
| युज् | 58 |
| रुध् | 29 |
| रुह् | 46 |
| लभ् | 65 |
| लिप् | 55 |
| लिह् | 52 |
| लुप् | 86 |
| वस् | 55 |
| वह् | 46 |
| विश् | 22 |
| वृ | 84 |
| व्यध् | 71 |
| शप् | 19 |
| शी | 112 |
| श्रि | 49 |
| श्रु | 3 |
| सिच् | 16 |
| सृ | 49 |
| स्तु | 49 |
| स्वप् | 67 |
| हन् | 19 |
| ह्नु | 95 |
| क्षिप् | 19 |
| ज्ञा | 3 |

# उपसर्गयोगेन भिन्नार्थकानां धातूनाम् अनुक्रमणिका ॥


| धातुः | पृष्ठम् | उपसर्गाः |
|---|---|---|
| अय् | 16 | उत्, परा |
| आप् | 49 | अव, सम्, प्र, वि |
| आस् | 98 | अधि, अनु, उप, उत् |
| इ | 29 | अति, अधि, अनु, उप, अभि, अव, प्रति, वि, व्यप, सम् |
| ईक्ष् | 39 | अप, अव, उप, परि, प्र, प्रति, वि, सम् |
| कल् | 84 | आ, वि, सम् |
| क्रम् | 31 | अनु |
| ग्रह् | 7 | अनु, नि, परि, प्रति, वि, सम् |
| चक्ष् | 71 | आ, प्रत्या, व्या |
| चर् | 42 | प्र, वि, सम |
| चि | 51 | निस्, परि, वि, सम् |
| जि | 87 | परा, वि |
| ज्ञा | 29 | आ, वि, अनु |
| तॄ | 61 | अव, वि, उत्, निस् |
| दा | 75 | आ, उप |
| धा | 75 | अतिसम्, अपि (पि) अभि, अव, नि, परि, सम् |
| पद् | 16 | आ, उत्, उप, निष्, प्र, प्रति, वि, विप्रति, सम् |
| पाद् | 82 | आ, उत्, उप, निस्, प्रति, सम्, आ |
| बन्ध् | 65 | अनु, उत्, निर्, प्रति, सं, आ |
| भा | 13 | प्रति, वि, अनु |
| मज्ज् | 61 | उत्, प्र |

| धातुः | पृष्ठम् | उपसर्गाः |
|---|---|---|
| मद् | 51 | उत्, प्र |
| मा | 10 | अनु. निर्, परि, प्र |
| युज् | 10 | अनु, अभि, उत्, उप, नि, प्र, वि, विनि, सम् |
| रुध् | 84 | अनु, अव, उप, नि, वि |
| लभ् | 42 | आ, उप, उपा, विप्र |
| लम्ब् | 63 | अव. आ. वि |
| वह् | 13 | आ, उत्, निर्, प्र, वि |
| विश् | 23 | आ, उप, निर्, प्र, सम् |
| वृ | 23 | आ. अप, अपा, वि, सम् |
| शी | 7 | अति, अनु, आ, वि, सम् |
| श्वस् | 49 | आ, निस्, वि |
| सद् | 31 | आ, उत् उप, नि, प्र, वि, प्रत्या |
| सृ | 49 | अनु, अप, उप, निः, परि, प्र |
| स्मृ | 71 | वि, सम् |

## उपसर्गयोगात् आत्मनेपदि धातूनाम् अनुक्रमणिका ॥

| | | |
|---|---|---|
| क्री | 109 | वि, परि, अव |
| क्रम् | 26 | उप, प्र |
| वद् | 80 | वि |
| स्था | 29 | सम् |
| स्था | 106 | आ, सम्, अव, प्र, वि, उप |

## उपसर्गयोगात् परस्मैपदि धातूनाम् अनुक्रमणिका ॥

| | | |
|---|---|---|
| वह् | 102 | प्र |

## Sanskrit Participles with English equivalents and Examples

| | | |
|---|---|---|
| 1. Past Passive Participle | कर्मणिक्त प्रत्ययः | Ex. जितः |
| 2. Past Active Participle | क्तवतु प्रत्ययः ... | जितवान् |
| 3. Present Active Participle | शतृ प्रत्ययः ... | जयन् |
| 4. Present Passive Participle | शानच् प्रत्ययः ... | जीयमानः |
| 5. Indeelinable Past Participle (with-outPreposition) | क्त्वा प्रत्ययः ... | जित्वा |
| 6. Indeclinable Past Participle (with· Preposition) | ल्यप् प्रत्ययः ... | विजित्य |
| 7. Infinitive of Purpose | तुमुन् प्रत्ययः ... | जेतुम् |
| 8. Potential Passive Participle | 1 तव्य प्रत्ययः | जेतव्यम् |
| | 2 य प्रत्ययः | जेयम् |
| | 3 अनीय प्रत्ययः | जयनीयम् |

Note:—(1) Words having 1 to 4 and 8th Participles are Adjectives (विशेषण शब्दः)

(2) Words having 5th, 6th and 7th Participles are indeclinables (अव्ययाः)

शुभं भूयात् । समस्तसन्मङ्गळानि सन्तु ॥